*Poetry Book Society Recommendation*

# *The Striders*

**A. K. RAMANUJAN**

A. K. Ramanujan was born in India in 1929 and now lives in America where he is an Assistant Professor of Linguistics in the University of Chicago. His professional concern with the structure and balance of language is reflected in the poise and movement of poems whose rhythms are as sure as they are relaxed. He writes chiefly of his experience of India, his perceptions ordered and sharpened by years of detachment in the West. Though his poems have appeared in magazines in India and on both sides of the Atlantic, this is his first published collection and it is a Poetry Book Society Recommendation for Spring 1966.

'There is some very impressive work in A. K. Ramanujan's first collection. These poems are often as ingenious in their wordcraft as they are sophisticated, unsolemn, and modern in tone. Their outstanding characteristic is a witty use of images, often combined with a strong but unruffled lyricism.... Ramanujan, living in America, has produced poems in a modern American style about his Indian childhood.'
*The Guardian*, London

*price 18s*

## *Oxford University Press*

# Journal
OF THE
# University of Bombay

[ARTS NUMBER]

VOL. XXXIII (New Series) SEPTEMBER 1964 PART 2

CONTENTS

ARTICLES PAGE

The Aśvins in the Ṛgveda and their traces in the later Literature—Part I ... K. P. Jog ... ... 1

The Concept of Sakhya in the Ṛgveda ... U. R. Bhise ... ... 51

On the Language and Composition of the Ṛgvidhānā ... ... ... ... ... ... Dr. M. S. Bhat ... 56

Comparison between the Definitions of Sthita-prajna in the Gītā and in the Viveka Cūdāmani ... ... ... ... ... Dr. R. S. Betai ... 73

Similes in Śankara's Bhāsya on the Śvetāsvataropaniṣad ... ... ... ... ... M. D. Paradkar ... 85

Problems of Biological Philosophy with Regard to the Philosophy of the Upanishads ... ... ... ... ... ... ... Bernhard Rensch ... 89

Influence of the Meghaduta on Sanskrit Literature ... ... ... ... ... ... Dr. (Miss) G. V. Davane 96

War Machine in Ancient India ... ... H. S. Ursekar ... ... 119

Shrisankarābhyudaykāvyam... ... ... Dr. W. R. Antarkar ... 128

A Study of Deśya Words from the Mahāpurāna of Puspadanta ... ... ... Dr. Ratna Shriyan ... 168

BOOK REVIEWS

Prākrta Sāhitykā Itihasa ... ... ... ... ... ... ... 189

Vyavahārprakāśa of Prithvicandra ... ... ... ... ... ... 190

Iśvarakṛṣna ... ... ... ... ... ... ... ... ... ... 192

Glimpses of Urdu Literature ... ... ... ... ... ... 193

A Grammar of Old Marathi ... ... ... ... ... ... ... 193

Krdantarūpamālā ... ... ... ... ... ... ... ... 194

Dr. Mirashi Felicitation Volume ... ... ... ... ... ... ... 198

# श्रीशङ्कराभ्युदयकाव्यम् ।

BY

**नीलकण्ठ**

EDITED BY

DR. W. R. ANTARKAR, M.A., LL.B., PH.D.

# INTRODUCTION

IT is proposed to publish some of the yet unpublished biographies of Śrī Śaṅkarācārya, procured and brought to light by us for the first time, during our research on his life. The work proposed to be published now is Śaṅkarābhyudaya by Nīlakaṇṭha. The present edition of the work is based on a Devanāgarī copy of a solitary copy of the same, printed in Telugu characters in the South. The Telugu copy was kindly lent to us by Paṇḍit Kavīśvara Śāstrin of Poona.

*Author*: The ending stanzas of the different chapters give the author's name as Nīlakaṇṭha. In the concluding stanzas of the last chapter of the work, the author mentions Cidghanānanda and Veṅkammā as his grand-parents, Tryṁbaka as his paternal uncle and Trivikrama and Pārvatī as his parents resp. He tells us further that he studied Nyāya and Vyākaraṇa from one Gaṅgādhara Śarman, (the dual in 'Śarmabhyāṁ' is not understood), and that his (spiritual) preceptor was one Śaṅkarānanda Sarasvatī. He has also saluted Nṛsimha Bhāratī Svāmī, which indicates his adherence to the Śṛṅgerī Mutt.

*Date*: Another well-known work called Śaṅkara-Mandāra Saurabha is also written by one Nīlakaṇṭha. It is curious that all the antecedents of these two Nīlakaṇṭhas are exactly identical and yet none of the two works refers to the other even indirectly. It seems highly probable that the two are one and the same person. If this is true, the date of out author can be determined as follows:

(1) Trivikrama, the author's father, composed in 1805 A.D. his work Pañcāyudha-prapañca Bhāna.

(2) At the end of Ś. M. S., the author salutes Deśikas called Śrīman Nṛsimha Bhāratī and others, by which are now to be understood Nṛsimha Bhāratī Svāmī and/or Saccidānanda Śiva Abhinava Nṛsimha Bhāratī, for after 1805 A.D. these two Ācāryas only of the Śṛṅgerī Mutt bear the title Nṛsimha Bhāratī. According to the Śṛṅgerī Guru Paramparāl these two acaryas reigned between 1817 A.D. and 1879 A.D. and 1879 A.D. and 1912 A.D. resp.

From these two pieces of evidence, the author of Ś. M.S. and also of the present work, namely Śaṅkarābhyudaya, (which also pays homage to Nṛsimha Bhāratī) can reasonably be placed in the middle of the 19th century A.D.

*Nature of the work*: The work is in six sargas or chapters and is, unlike the Ś.M.S. unmixed poetry. It uses a few metres comparatively and the generally known ones like Vasantatilakā (IV: 1, VI: 104) Mālinī (I: 72) Mandākrānta (VI: 99), Pṛthvī (VI: 103), Anuṣṭubh (VI: 100), Śārdūlavikrīdita (IV: 7, VI: 105). It generally follows the version of Madhava's S. Ś. Jaya (a/s Śrī Vidyāraṇya's Śāṅkara-Digvijaya) while in matters cf details it agrees with the version of Ś.M.S. Yet it has some variations of its own. Some of them are:

(1) When, at the conclusion of his studies, Śaṅkara was asked by his Guru to go home, he requested his Guru to name his fee. The latter, however, refused to do so. Śaṅkara, thereupon, pressed his feet with his fore-head and with his permision returned home. Mādhava makes no mention of this fee-incident while according to Ś.M.S., Śaṅkara offered his Guru 1000 salutes by way of fee and then returned home.

(2) When asked by Śaṅksra's mother about his life-span, Agastya, acording to our present work, told her that Brahmā had originally fixed it at eight years, that Śaṅkara would earn by penance another eight years and that Vyāsa would extend the term by sixteen years more. According to both, S. Ś. Jaya and Ś.M. S., however, Agastya said that Śaṅkara's life-span was 16 years. Mādhava further adds the Śaṅkara would live for 16 years more.

It is unnecessary to multiply such instances or to comment on them. Even like the Ś.M.S., this work mentions 788 A.D. as the year of Śaṅkara's birth and Vaiśākha Pūrṇimā as the day of his passing away. This, however, does not invest it with any particular historical authenticity. Even like the S.Ś. Jaya and the Ś.M.S., it has no better claim thereto than as a corroboration of the main incidents of Śaṅkara's life.

1. St. 21: This seems to give the name of Śivaguru's wife as Vimalā. It is to be noted that this is different from the name given by other biographers whenever they choose to do so. Cid. and Bṛ. Saras. give it as Āryā and Āryāmabā resp. (vide Ś.V.V. II: 40 and V: 30, Bṛ. Ś. V. IX: 5). Vyā., Mād. and Rāja. D. refer to her as the daughter of Makhapaṇḍita.

2. Ch. I: St.23. This line as it is makes no sense. It may be read as follows: स्वाप्नीं कथां संगदितां प्रबोधं प्राक्तेन पत्या निशमय्य भर्या ॥

3. Ch. I: St: 26: This is one of the two or three works to give the date of Śaṅkara's birth. Here it is mentioned as 3889th year of Kali Era, Vibhava Saṁvat, Bright half 10th day—which can be rendered as 788 A.D., Vaiśākha śukla 10th. These particulars are in complete agreement with those given by Ś. M. S. No other work gives such definite particulars.



4. Ch. I: 31: a. There is a great controversy regarding the identity of the three persons, Maṇḍana, Viśvarūpa and Sureśvara. Some hold that Maṇḍana and Viśvarūpa are different persons and that one of them subsequently became Sureśvara at the hands of Śaṅkara. The author of the present work seems to belong to the group of those persons who hold that the three names were borne by one and the same person, the name Sureśvara being the one after sannyasa. It may, however, be pointed out that the author makes only one more reference to the name Viśvarūpa (vide 4: 45) and that too, as it appears, without much specific propriety or significance.

5 Ch: I: St. 60. The story of this king of Kerala has been given by the late writers only like Tiru. D., Rāja. D., Mādhava, Sadānanda, author of G. V. K., Parameśvara Kavikaṇṭhī rava and the author of Ś. M. S., all of whom give the name of the king as Rājaśekhara. Dr. Zāmbre has, however, shown in his thesis on Rājaśekhara that,

(*i*) the dramatist Rājaśekhara belonged to the 10th cent. A.D.,

(*ii*) The dramatist Rājaśekhara was never a king and no king of that name was ever a dramatist, and

(*iii*) no king named Rājaśekhara is ever known to have ruled over Kerala.

This story has, therefore, to be rejected at least for the time being.

6. Ch.II: St. 47, 48. This story of Govindamuni telling Śaṅkara that for attaining Brahmajñāna ( परतत्त्वबुद्धये ) service to a Guru is necessary, then his stretching his feet out of the cave and Śaṅkara placing his head thereon, is different from that of the other biographers who tell us that as soon as Śaṅkara came to the hermitage and announced himself to Govindamuni, the latter asked him his antecedents and the purpose of his visit. When Śaṅkara explained the same, he was initiated into sannyāsa and thereafter he stayed there and served his Guru for some time, during which he also studied Vedānta under him.

7. Ch.: III: St. 70. Nīlakaṇṭha is the only biographer to tell us that Śaṅkara sprinkled on Kumārila a few drops of water from his kamaṇḍalu and revived him and that thereafter Kumārila was initiated by Śaṅkara into the higher mystical knowledge. He then left his body like a yogin and attained final beatitutde. All the other biographers tell us that Kumārila politely refused to be revived and ended in the flames only.

## Abbreviations

| | | |
|---|---|---|
| (*i*) | S. S. Jaya | Saṅkṣepa Śaṅkara Jaya |
| (*ii*) | Ś. M. S. | Śaṅkara Mandāra Saurabha |
| (*iii*) | Ś. V. V. | Śaṅkara Vijaya Vilāsa |
| (*iv*) | Bṛ. Ś. V. | Bṛhat Śaṅkara Vijaya |
| (*v*) | G. V. K. | Guru Vaṁśa Kāyva |
| (*vi*) | Vyā | Vyāsācala |
| (*vii*) | Cid. | Cidvilāsa |
| (*viii*) | Tiru. D. | Tirumala Dīxit |
| (*i**) | Rāja. D. | Rājacūdamani Dīxit |
| (*) | Br. Saras | Brahmānanda Sarasvatī |

श्रीगणेशशारदागुरुभ्यो नमः । श्रीबनशङ्कर्यै नमः । श्रीशङ्कराभ्युदयकाव्यप्रारम्भः ।

लक्ष्मीशगौरीशमुखस्वरूपैर्वितन्वते भक्तजनप्रमोदम् ।
जगज्जनुस्थेमविलोपकर्त्रे महेश्वराय प्रणतोऽस्मि नित्यम् ॥ १ ॥
श्रीनारदः कामचरः कदाचिल्लोकान्दिदृक्षुर्वसुधामवाप्य ।
आम्नायमार्गं परिमुच्य लोकानसत्पथे सञ्चरतो ददर्श ॥ २ ॥
भोगापवर्गौ निरयाध्वरोधो यतस्तमाम्नायमपास्य मन्दाः ।
मार्गेषु वैवस्वतयातनानां निदानभूतेषू चरन्ति हन्त ॥ ३ ॥
एवं विषण्णः स महामुनीन्द्रः पुनर्दिवं प्राप्य सुरान्बभाषे ।
स्वार्थस्य हानिं बत येन वित्थ कथं नु तान्वो विबुधानवैमि ॥ ४ ॥
यज्ञेन वृत्तिर्भवतां न सिद्ध्येदास्तिक्यतो भूमितलेऽद्य तत्तु ।
कात्स्न्र्येन लुप्तं जिनबुद्धमुख्यैः श्रद्धा कुशास्त्रे जनिता नृणां यत् ॥ ५ ॥
अतो महेशं प्रतिपद्य यूयं तं प्रार्थयध्वं कुमतीन्निगृह्य ।
आम्नायमार्गे मनुजान्विधातुं स्वार्थः परार्थश्च ततोऽभिराध्येत् ॥ ६ ॥
महामुनेर्वाक्यमिदं निशम्य गीर्वाणवर्या अगमन्गिरीन्द्रम् ।
कैलासनामानमथो अदर्शन्महेश्वरं शैलसुतासहायम् ॥ ७ ॥
भक्त्या प्रणम्याञ्जलिमारचय्य स्थितानमूल्लोकपतिर्बभाषे ।
भोः स्वागतं वः कुशलं सुरेन्द्राः कमर्थमुद्दिश्य समागताः स्थ ॥ ८ ॥
दयार्द्रचित्तेन महेश्वरेण प्रसादपूर्वं गदतां निशम्य ।
वाचं सुरा वेदविरोधिशिक्षां नृणां सुमार्गे स्थितिमार्थयन्त ॥ ९ ॥
अथेन्दुमौलिः प्रमदं सुराणां तन्वन्निति क्रौञ्चभिदं बभाषे ।
कुमार भूमाववतीर्य लोकान्वेदोक्तसत्कर्मजुषो विधेहि ॥ १० ॥
तर्कैरसद्भिर्जनमोहकानां कुतीर्थिनां निग्रहमन्तरेण ।
जनेषु नैवाऽस्तिकता प्ररोहेत्तन्निग्रहे नैव पटुस्त्वदन्यः ॥ ११ ॥
इन्द्रोऽपि भूमाववतीर्य राजभावेन साहायकरो भवेत्ते ।
आज्ञा हि गुर्वी परमेश्वरस्य ततः सतां नम्रशिरा उवाच ॥ १२ ॥
अथेश्वरो देववरान् बभाषे कृतावतारो भुवि शङ्कराख्यः ।
संसारबन्धं क्षपयामि पुंसां ज्ञानेन दुष्टांश्च विनिग्रहीष्ये ॥ १३ ॥
सेवध्वमासाद्य मनुष्यभावं यूयं तदा मामिति तान्निगद्य ।
विसर्जयामास सुरान्महेशस्तेऽप्यापुराऽऽत्मीयपदं समोदाः ॥ १४ ॥
कुमारिलाभ्यो जनुरेत्य भूमौ कुमार आसीद्खलशासनस्तु ।
सुधन्वनामा नृपतिः सहायस्तस्यैष आसीद्विजये खलानाम् ॥ १५ ॥
दुष्टान्निगृह्याऽथ कुमारिलः स वेदोक्तसत्कर्मपथे प्रचारम् ।
जनाननैषीदथ मेरुधन्वा भूमौ प्रभूतिं प्रतिपत्तुमैच्छत् ॥ १६ ॥
कमीरयन्तं परमेश्वरं लात्यादत्त इत्यर्थककेरलाख्याम् ।
स्वास्मिन्महेशो दयतो दधानो देशोऽस्ति सत्कर्मपराभिपूर्णः ॥ १७ ॥



तत्राऽस्ति कालटचभिधोऽग्रहारो विद्याधिराजाभिधविप्रवर्यः ।
बभूव तस्मिन्शिवगुर्वभिख्यस्तस्याऽत्मजोऽभून्महतां वरेण्यः ॥ १८ ॥
धनं च विद्येत्युभयं प्रभूतं प्रायेण नैकत्र निवासमेति ।
नैवैक्षिताभ्यां सहिता विनीतिर्महानुभावे त्रितयं तदासीत् ॥ १९ ॥
यन्मानुषानन्दनिदानमेतत्सर्वं समस्तक्षितिपालतायाः ।
अन्यद्बभूवात्र तथापि नासौ मुदं प्रपेदे तनयानवाप्य ॥ २० ॥
आराधयामास ततो महेशं समं स्वपत्न्या विमलाख्यया सः ।[1]
तदीयपूजातिशयात्प्रसन्नः स्वप्ने तमूचे मकरध्वजारिः ॥ २१ ॥
वृणीष्व पुत्रं सकलज्ञमेकमल्पायुषं मन्दमतीन्बहून्वा ।
दीर्घायुषोऽथो सकलज्ञमेव व्रवे सुतं पण्डितसार्वभौमः ॥ २२ ॥
स्वाप्नीं कथां संगततां प्रबोधं प्राप्तेन पत्या निशमय्य भार्या ।[2]
वन्ध्यात्वदोषो हि महान्वधूनां तं मार्ष्टयेपत्यं मम हीत्यनन्दत् ॥२३॥
वव्रे सुतं सर्वविदं द्विजन्मा मत्तो परो नाऽस्त्यखिलज्ञभावः ।
अतोऽस्य पुत्रत्वमहं भजामीत्येतत्कलत्रोदरमीश्वरोऽगात् ॥ २४ ॥
महेशतेजोमयगर्भवत्यास्तेजो यदासीद्विमलाभिधायाः ।
तेनैव सर्वेऽपि जना अजानन्नप्राकृतोऽस्यां प्रभविष्यतीति ॥ २५ ॥
नवाधिकाशीतियुताष्टशत्या युक्ते सहस्रत्रितये व्यतीते ।
कलेः समानां विभवाब्दराधसिते दशम्यामुदभून्महेशः ॥ २६ ॥[3]
तदाऽनदन् दुन्दुभयः सुराणां मुदा प्रनृत्ता दिवि देववेश्याः ।
कल्पप्रसूनानि नवानि जाते त्रिलोकनाथे ववृषुः सुरेन्द्राः ॥ २७ ॥
पिताऽस्य चक्रे शिवगुर्वभिख्यो या जातकर्माभिधसंस्क्रिया ताम् ।
अह्नां दशानामतिवर्तने संन्यधत्त नामापि च शङ्करेति ॥ २८ ॥
भजन्क्रमेणोपचयं स देवः प्रवर्तयल्लौकिकबालचेष्टः ।
द्विहायनः संचरणक्षमत्वं भाषाप्रगल्भत्वमपि प्रपेदे ॥ २९ ॥
अथेश्वरं भूमितलावतीर्णं निषेवमाणाः दिविजप्रबर्हाः ।
कुलेषु शुद्धेष्वतिपावनानां प्रपेदिरे जन्म महीसुराणाम् ॥ ३० ॥
पद्मासनो मण्डनविश्वरूपसुरेश्वराख्याविषयो बभूव ।[4]
वायुस्तु हस्तामलकाभिधानो मरुत्सखस्तोटकनामधेयः ॥ ३१ ॥
सनन्दनो विष्णुरभूत्स पद्मपादेति नामान्तरमप्यवाप ।
भागीरथीनिर्गमिताम्बुजेषु विन्यस्तवान्स्वाङ्घ्रिसरोरुहे यत् ॥ ३२ ॥
इत्यादयो ये दिविजावतारास्तैरीश्वरांशेन च शङ्करेण ।
भूमिर्विरेजे सह तारकौघा निशामुखे द्यौरिव पूर्णचन्द्रा ॥३३॥
दूर्वासिसि ब्रह्मसमीपभाजि पुरैकदा कुर्वति वेदपाठम् ।
वाणी स्वरस्य स्खलनं समीक्ष्य जहास चुक्रोध ततो मुनीन्द्रः ॥ ३४ ॥

शशाप तां तेन मनुष्यभावं भजिति तद्दैन्यमवेक्ष्य सोऽथ ।
शापाद्विमुक्ता भविताऽसि शम्भोरंशेन भङ्गं गमितेत्यवादीत् ॥ ३५ ॥

दुर्वाससः शापबलेन वाणी भूमावभूत्तां परिणीय वेधाः ।
कृतावतारो भुवि मण्डनाख्यो माहिष्मतीवासपरो बभूव ॥ ३६ ॥

शिशोः शिवांशस्य तृतीयवर्षे प्रवर्तमाने जनको लिपिं स्वाम् ।
तं ग्राहयामास सकृन्निगादाज्जग्राह तामन्यलिपीस्ततोऽसौ ॥ ३७ ॥

पुरोपनीतेर्यदवापनीयं काव्यादि तस्मिन् कुशलत्वमेषः ।
अखेदयित्वा गुरुमाससाद किं चित्रमेतत्परमेश्वरे स्यात् ॥ ३८ ॥

बालं त्रिवर्षं प्रविधाय चूडासंस्कारभाजं जनकः प्रमीतः ।
बालप्रजां तस्य वधूं तदानीमसान्त्वयन्बन्धुजनाः सशोकाम् ॥ ३९ ॥

निवापकृत्यं विनिवर्त्य तस्य तज्ज्ञातयः पञ्चमवर्षभाजम् ।
उपानयञ्शङ्करमाप वेदानध्येतुकामो गुरुवेश्म सोऽथ ॥ ४० ॥

प्रमादमुन्मुच्य निजाश्रमस्य कर्माणि कुर्वन्नुचितानि भक्त्या ।
निषेवमाणो गुरुमध्यगीष्ट वेदांश्च शास्त्राणि च शङ्करांशः ॥ ४१ ॥

कदाचिदाचार्यकुले वसन्स द्विजन्मनां वेश्मसु भैक्ष्यकामः ।
चरञ्जगाहे गृहमग्रजातेर्नितान्तदारिद्र्यसमाकुलस्य ॥ ४२ ॥

अहो महात्मन् भवतेति दीनां वयं न दातुं किमपि क्षमः स्मः ।
इतीरयित्वा गृहिणी तदीया ससर्ज बाष्पाम्बु महाप्रवाहम् ॥ ४३ ॥

अथ क्षणाद्दैववशात्स्वगेहे स्थित्वा स्थितान्यामलकीफलानि ।
आनीय तान्यर्पितवत्यमुष्मै विलज्जमाना तदयोग्यदानात् ॥ ४४ ॥

श्रीशङ्करो दैन्यमवेक्ष्य तस्या आसाद्य सान्द्रां करुणामनावीत् ।
देवीं मुरारेर्गृहिणीं तदीयदारिद्र्यविच्छेदफलाभिकाङ्क्षी ॥ ४५ ॥

सन्तोषयन्ती मनुजेन्द्रमौलिं पद्मालया विप्रवरस्य गेहम् ।
सम्पूर्य हेमामलकव्रजेन चक्रे मनांस्यद्भुतभाञ्जि नृणाम् ॥ ४६ ॥

एवं प्रभावो हि मुनि · · · नैवात्मसंभाविततामयासीत् ।
महात्मनां चिह्नमिदं यदात्मगुणप्रकर्षेऽप्यनहङ्कृतित्वम् ॥ ४७ ॥

आसप्तमाद्वाग्दुरुसद्मवासं कुर्वन्नधीते स्म स तावदस्य ।
समस्तविद्याकुशलत्वमासीत्तं तादृशं तस्य गुरुर्बभाषे ॥ ४८ ॥

वत्सोपकुर्वाणजनो यदर्थं गुरोः कुलं वासमुपैति तत्ते ।
सर्वं सुनिष्पन्नमतः स्वगेहं गत्वा गृहीभूय सुखी वसेति ॥ ४९ ॥

गुरो त्वदभ्यर्थिदक्षिणायाः समर्पणं मे प्रविधेयमेनाम् ।
ब्रूहीत्यवोचत्स गुरुं स ऊचे न दक्षिणां शिष्यगणाद्ग्रहीष्ये ॥ ५० ॥

अचाल्यचित्तत्व……स स्वगुरोस्तदङ्घ्री शिरसा निपीड्य ।
प्राप्याभ्यनुज्ञां गमने स भेजे पादारविन्दान्तिकमम्बिकायाः ॥ ५१ ॥



कालाद्वहोरेत्य नतं सुतं स्वं समस्तविद्यानिपुणं निशम्य ।
जहर्ष माताथ पितास्य भेजे सहर्षमेतादृशमित्यशोचत् ॥ ५२ ॥

निषेवमाणो जननीं महत्या भक्त्या सदावर्तितवेदपाठः ।
अग्निं च भास्वन्तमुपास्त शिष्यानपाठयच्चातिविनीतिभाजः ॥ ५३ ॥

सर्वज्ञतामल्पवयस्कतां च वीक्ष्याऽस्य विस्मेरमना जनोऽभूत् ।
अथो विमर्शेन महेशमेनं जज्ञुः सपुण्याः कतिचिन्महान्तः ॥ ५४ ॥

अथैकदा शङ्करदेशिकस्य माता नदीं स्नातुमना जगाम ।
अत्यन्तदूरां निजमन्दिरस्य स्नाता न चायातुमतः शशाक ॥ ५५ ॥

निदाघकालोग्रसहस्रभानुकरैः प्रतप्ताः सिकता हि नद्याः ।
विलम्बहेतोरविभावनेन शङ्कां प्रपेदे महतीं मुनीन्द्रः ॥ ५६ ॥

गत्वा नदीं तां निजशिष्यवर्गनिषिक्तवारा जननीं सरण्याः ।
स्वमन्दिरं मूर्ध्नि धृतातपत्रः शनैरनैषीन्महतां वरेण्यः ॥ ५७ ॥

तामग्रहारान्तिकमानिनीषुर्नदीं प्रसूखेदनिराकरिष्णुः ।
श्रीशङ्करः संस्तुतवान्नदी सा स्तुता निशायामुपशल्यमागात् ॥ ५८ ॥

तामग्रहारान्तिक एव काल्ये नदीं वहन्तीमवलोक्य लोकः ।
चित्रीयमाणस्तमवेत्प्रभावं श्रीशङ्करस्यावधृतानुभावः ॥ ५९ ॥

श्रीशङ्करस्याथ गुणान्निशम्य दिदृक्षया केरलभूमिपालः ।
आनेतुमेतं प्रजिघाय कञ्चिद्विनीतिमन्तं सचिवं सुबुद्धिम् ॥ ६० ॥

स शङ्करं प्राप्य यथाविधानं ननाम प्रपच्छ तमार्यपादः ।
कस्ते निवासस्त्वमिहागतोऽसि प्रयोजनं किं हृदये निधाय ॥ ६१ ॥

स शङ्कराचार्यमुवाच भृत्यः स्वामिन्नहं केरलभूमिभर्तुः ।
स त्वद्गुणाकर्णनजातभक्तिः संदर्शनेच्छुः प्रजिघाय मां ते ॥ ६२ ॥

स सिन्धुरं तेऽर्पितवानसौ ते द्वार्यस्ति रूप्याचलवद्भवन्ताम् ।
ऊढ्वा कृतार्थत्वमवाप्तकामस्तवागतोऽभ्यर्णमिवाञ्जनाद्रिः ॥ ६३ ॥

एवं गृहीत्वेह कृताधिरोहो भक्तानुकम्पामयमानसस्त्वम् ।
यतस्व तस्यान्तिकमाशु गन्तुमस्मत्प्रभोर्यस्त्वयि सान्द्रभक्तिः ॥ ६४ ॥

प्रतिग्रहान्मे विमुखं मनोऽहं न राजधानीं प्रविशामि, याहि ।
ब्रूह्येतमर्थं यदि दर्शनेच्छा स एव संप्राप्स्यति संनिधिं नः ॥ ६५ ॥

इतीरयित्वा विससर्ज राजदूतं स गत्वा मुनिनोक्तमर्थम् ।
राजानमूचे स तदीक्षणाय तस्योपकण्ठं द्रुतमाजगाम । ६६ ॥

हेमायुतं सद्गुरवेऽर्पयित्वा ननाम राजाऽथ निरामयं तम् ।
पृष्ट्वा चिरं तेन स सल्लँलाप राजा मुनेरादरतो जहर्ष ॥ ६७ ॥

सन्नाटकानां त्रितयं प्रणीतं स्वेन क्षितीशः पुरतो मुनीन्दोः ।
पपाठ तेनाऽतितरां प्रसन्नो मुनिर्वरं याच नृपेत्यवादीत् ॥ ६८ ॥

पुत्रो महात्मन् सुगुणो ममास्तु तव प्रसादादिति सोऽप्ययाचत् ।
विधेहि पुत्रेष्टिमथोक्तधर्मा पुत्रो भवेद्वंशविवर्धनस्ते ॥ ६९ ॥
मुनेरिमां वाचमसौ निशम्य प्रमोदकाष्ठामविदन्नृपालः ।
अथाह राजन् कनकायुतं यत्त्वया ममाग्रे निहितं तदेतत् ॥ ७० ॥
अत्राग्रहारे बहवः सुशीलाः कुटुम्बिनो विप्रवरा वसन्ति ।
अधीतिनो वेदतदङ्गशास्त्रेष्वेभ्यो दिशाऽहं न धनाभिलाषी ॥ ७१ ॥
इति वदति मुनीन्द्रे प्रार्थितेऽपि ग्रहीतुम् । धनमनुमतिशून्ये तन्निदेशं विधाय ।
तदनुमतिगतिस्त्वं भूरिवारं प्रणम्य । स्वपुरमभिययौ स ध्याततत्सद्गुणौद्यः ॥ ७२ ॥
यद्धीर्जगज्जातमिवासुरारेस्तनूरखेदाभृतशास्त्रजातम् ।
त्रिविक्रमाभिख्यतदात्मजन्मा यः पार्वतीनन्दनतामयासीत् ॥ ७३ ॥
नीलकण्ठेन तेनास्मिन् शङ्कराभ्युदयाभिधे ।
कृते काव्ये प्राथमिकः सर्गः संपूर्णतां गतः ॥ ७४ ॥
॥ इति श्रीशङ्कराभ्युदयाख्ये काव्ये प्रथमः सर्गः संपूर्णः ॥
श्रीमहात्रिपुरसुन्दर्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

**॥ अथ द्वितीयसर्गप्रारम्भः ॥**

बहवो विनयेन सेविताच्छुतिशास्त्राण्यलभन्त शङ्करात् ।
शुशुभे स विनेयकोटिभिः किरणानां निवहैरिवांशुमान् ॥ १ ॥
तपसा विनयेन विद्यया भुवि सर्वानतिशय्य भासुरम् ।
प्रययाववलोक्य शङ्करं जननीसंमदपूरमग्नताम् ॥ २ ॥
सकलत्रमिमं विधास्यती व्यचिनोदाप्तमुखेन कन्यकाम् ।
सदृशीं गुणरूपसम्पदा बहवो दातुमकामयन्त च ॥ ३ ॥
स तु नैच्छदुदारमानसः सकलत्रत्वमवेक्ष्य देहिनाम् ।
सकलत्रतया प्रवर्तिता विपदो दुर्विषहा अनेकशः ॥ ४ ॥
अवतीर्णमथ क्षमातले भगवन्तं मकरध्वजान्तकम् ।
अवलोकितुमिच्छवो महामुनयोऽगस्त्यमुखा उपागमन् ॥ ५ ॥
अभिगम्य महामुनीनमून् गृहमानीय विधाय चार्हणाम् ।
अपनीतपथिश्रमान् मुनिः स्वनिरीक्षामुदितानभाषत ॥ ६ ॥
सफलं जनुरद्य मे यतो भगवन्तो मदनुग्रहेच्छया ।
मम मन्दिरमागताः सुरप्रवरैरप्यनवाप्यदर्शनाः ॥ ७ ॥
अथ ते मुनयोऽब्रुवन् प्रभो त्वदनुग्राह्यपदं यियासवः ।
वयमत्र समागतास्त्वया विपरीतं कथमभ्युदीरितम् ॥ ८ ॥
इदमादिवचःपरम्पराजनितां निर्वृतिमाप्नुवन्नमी ।
मुनयः स च शङ्करोऽथतज्जननी तत्सविधं समागता ॥ ९ ॥
तनयेन निवेदिताभिधामहिमानो मुनयोऽभिवन्दिताः ।
धरणीतलसङ्गिमस्तकं प्रसवित्र्या मनुजान्धकद्विषः ॥ १० ॥



अथ सा न्यगदीन्मुनीश्वरान् भगवन्तस्तनयो ममैष कः ।
वयसि प्रथमेऽवगाढवाञ्श्रुतिशास्त्राम्बुनिधींस्तलावधि ॥ ११ ॥
अनुगृह्यत आगतैर्गृहं दिविजैरप्यभिलाष्यदर्शनैः ।
तपसां निधिभिर्भवादृशैः सुकृतं किं कृतवान् पुरा भवे ॥ १२ ॥
अथ तां कलशोद्भवो मुनिर्निजगादाम्ब पतिः पुरा तव ।
तनयस्पृहया महेश्वरं तपसाऽऽराधितवान्महीयसा ॥ १३ ॥
वृणु वैकमशेषवेदिनं सुतमल्पायुषमल्पवेदिनः ।
अथवा चिरजीविनो बहूनिति तं स्वप्नगतं शिवोऽब्रवीत् ॥ १४ ॥
वृणुते स्म समस्तवेदिनं स सुतं तत्तनयो महेश्वरः ।
अभवत्तव सर्ववेदिता न हि तस्मादितरत्र विद्यते ॥ १५ ॥
तदयं स्वत एव सर्वविन्न हि कर्म प्रभवेन्महेश्वरे ।
अमुमस्मदनुग्रहोन्मुखं प्रविधातुं वयमागता इह ॥ १६ ॥
कलशोद्भववाक्प्रबोधिता तनयस्याऽबहुकालजीविता ।
जननीं मुनिशेखरस्य तामनयच्छोकसमुद्रमग्नताम् ॥ १७ ॥
वचनात्तव सन्मुने मया विदितोऽल्पायुरयं ममात्मजः ।
परिणाममुदीरयायुषो दिवसानां पुनरित्यभाषत ॥ १८ ॥
विधिनाष्टकमायुरर्पितं शरदामष्टकमर्जयिष्यति ।
तपसैव पराशरात्मजो भगवान् षोडशकं प्रदास्यति ॥ १९ ॥
कलशोद्भववागियं च तां शुचमेवाऽगमयद्यतो हि सा ।
इयता स सुतो ममायुषा कृतकृत्यत्वमवाप्स्यतीत्यवेत् ॥ २० ॥
अथ तामनुमान्य निर्गमे मुनयो दूरमुपागतं च तम् ।
विनिवर्त्य यथागतं ययुर्व्यथिताः शङ्करविप्रयोगतः ॥ २१ ॥
अथ शोकपरीतमानसां भगवान्मातरमुक्तवान्मुनिः ।
प्रणयो जनिमत्सु नश्वरेष्वयि हेतुस्तनुधारिणां शुचाम् ॥ २२ ॥
तदपासनतो विना भवेत्तनुभाजां नहि तीर्णशोकता ।
त्यज शोकमिमं महत्तरं प्रविहाय प्रणयं विनाशिषु ॥ २३ ॥
न हि मे विषयाभिलाषिता तदहं प्राप्य तुरीयमाश्रमम् ।
प्रयते परतत्त्ववेदने यदिदं संसृतिदुःखनाशनम् ॥ २४ ॥
इति वादिनि शङ्करे प्रसूर्नितरां प्रव्यथिता जगाद तम् ।
श्रुतिशास्त्रविशारदो भवानिति नैर्घृण्यमगात्कथं मयि ॥ २५ ॥
न परः परिपालकोऽस्ति मे जरया चेन्द्रियपाटवं हृतम् ।
सुलभाश्च रुजो जरावतां सकलं नाविदितं तवास्त्यदः ॥ २६ ॥
तदपास्य यतित्वकामनां गृहितां याहि सुतानवाप्नुहि ।
बहवो गृह एव तत्त्वविद्वरतां प्रापुरिदं न वेत्सि किम् ॥ २७ ॥

अनया जननी गिरा मुनिर्यतिताप्राप्तिमनोरथं जहौ ।
जरसा च शुचा प्रपीडितां जननीं पर्यचरच्च सादरम् ॥ २८ ॥
अवगाढुमना अथैकदा स्वसमानीतनदीमयं ययौ ।
मकरश्चरणे तमग्रहीदथ चुक्रोश स लोकरीतिभाक् ॥ २९ ॥
मकरस्तनयं तवाऽग्रहीदिति लोकान्निशम्य तत्प्रसूः ।
रुदती द्रुतमेत्य वाहिनीं व्यलपद्वीक्ष्य सुतं तथाविधम् ॥ ३० ॥
जननीमथ शङ्करोऽ ब्रवीदनुमन्यस्व ममान्त्यमाश्रमम् ।
अथ तत्र करोमि सङ्गरं मकरो मोक्ष्यति मे पदं ततः ॥ ३१ ॥
इति वादिनमात्मजं प्रसूरनुमन्ये कुरु तत्र संगरम् ।
द्रुतमित्यवदत्स तं व्यधान्मकरोऽङ्घ्रिं मुमुचे ततः क्षणात् ॥ ३२ ॥
अथ तीरमवाप्य मातरं निजगादाम्ब पितुर्धनं मम ।
परिगृह्य मदीयबान्धवास्तव रक्षामवधाय कुर्वते ॥ ३३ ॥
अथ बन्धुजनानुपाह्वयन् धनमादध्वमिदं पितुर्मम ।
जननीमवतेत्युदीरयन्निदधे तेषु स मातरं निजाम् ॥ ३४ ॥
परिविव्रजिषुं सुतं ततो (जननी) स्माह ममात्यये सुत ।
कुरु संस्करणं त्वमित्यसावनुमेने जननीसमीहितम् ॥ ३५ ॥
जननीं स्थविरांश्च भूसुरानथ नत्वा यदुनाथमन्दिरम् ।
प्रययौ प्रणिनंसया हरिः पिहिताङ्गो निजगाद तत्र तम् ॥ ३६ ॥
उपशल्यमिवापिता त्वया तटिनी मत्प्रतिमां घनागमे ।
प्रवहन्ति तरङ्गमालया मुनिपुत्रात्र कुरु प्रतिक्रियाम् ॥ ३७ ॥
अथ तां प्रतिमां समुद्धरश्यधितात्र पदेऽनुपद्रवे ।
प्रतिमा स्थिरतामबन्धनाऽप्यभजत्तत्र मनेः प्रभावतः ॥ ३८ ॥
प्रणमन् यदुनायकं ततो जननीं चानुगतां महाशुचम् ।
विनिवर्त्य कथंचन द्रुतं निरगादिष्टजनांश्च शोचतः ॥ ३९ ॥
स विवेकविरागितादिभिः सुगुणैः साहजिकैरलङ्कृतः ।
मुनिराड् दिशमुत्तरामगादथ गोविन्दमुनीन्द्रसेविताम् ॥ ४० ॥
दिवसैर्बहुभिर्महापथं समतीत्येन्दुभवातटस्थिताम् ।
फलवत्तरुषण्डमण्डितं शुचि गोविन्दमहाश्रमं ययौ ॥ ४१ ॥
अनुयुज्य मुनीन्पथि स्थितान् क्व नु गोविन्दमुनेर्निवासभूः ।
इति तद्गदितामवाप तां प्रतिहारेण युतामणीयसा ॥ ४२ ॥
अभितां रचिताञ्जलिः स्थितो नुतवान् प्रार्थितवांश्च तं मुनिः ।
अतिमात्रमुदाभिवर्धितैः स्नपितः शीतलनेत्रवारिभिः ॥ ४३ ॥
भगवंस्त्वमशेषदेहिनामुपकाराय मनुष्यदेहभाक् ।
उरगेश्वर एव मानुषानतिवृत्तो महिमा ततस्तव ॥ ४४ ॥



बहुदुःखमयी हि संसृतिः प्रविहेया कृतबुद्धिभिर्जनैः ।
प्रविहातुमिमां समुत्सहे करुणा तेऽस्तु ममेष्टदायिनी ॥ ४५ ॥
इति शङ्करवागुपक्रमे सति गोविन्दमुनिः समाधितः ।
उदतिष्ठदशेषतद्वचः श्रुतवांस्तत्र दयां च संदधे ॥ ४६ ॥
अवदद्गुरुसेवया विना न भवेज्ज्ञानमवाप्तुमर्हता ।
भवता गुरुसेवनं ततः प्रविधेयं परतत्त्वबुद्धये ॥ ४७ ॥
प्रसृतापकरोद्बिलाद्बहिश्चरणौ स्वौ स्मृतिधूतकल्मषौ ।
स तयोर्निजमस्तकं मुनिर्निदधद्बाष्पजलैरसिञ्चत ॥ ४८ ॥[6]
युगलं गुरुपादयोः स्मरन् गुरुसेवामकरोच्चिरं मुनिः ।
तनुखेदमजीगगद्गुरुप्रणयानन्दयुतेन मानसे ॥ ४९ ॥
हरिधातृवसिष्ठशक्तितत्तनयव्यासशुकैः सगौडकैः ।
गुरुभिर्गमितां परं परं परविद्यां महतीमवाप यः ॥ ५० ॥
स गुरुश्चिरकालसेवनान्मुदितोऽस्मै चरमाश्रमं ददौ ।
अथ जीवपराभिदां चतुर्निगमान्तोक्तिभिरभ्युपादिशत् ॥ ५१ ॥
निगमान्तगिरामभेदतत्परतां जीवपरात्मनोः स्फुटाम् ।
रचयन् भगवान्पराशरप्रभवः सूत्रगणं यमातनोत् ॥ ५२ ॥
अतिगूढममुष्य भावमप्यमुमावेदितवान्महामुनिः ।
यमवेत्य स विन्दते जरामरणोदग्रविपत्परम्पराम् ॥ ५३ ॥
अभिदां परमात्मजीवयोर्भगवान्यां समुपादिशद्गुरुः ।
अपरोक्षतयैवतामवेत्सुकृती शुद्धमनाः स शङ्करः ॥ ५४ ॥
अथ शङ्करसन्मुनेर्महान् सहजानन्द उदस्तसंसृतिः ।
रुरुचे द्रुहिणादिसंमदान् श्रुतिरावेदयते यदंशकान् ॥ ५५ ॥
इति भावितवान्स सद्गुरोश्चरणांभोजपराङ्मुखस्य मे ।
इदमन्तरितं महासुखं विपदश्चाप्यभवन् दुरासदाः ॥ ५६ ॥
अनुवेलमनुस्मरन् गुरोरुपकारं भवबन्धविच्छिम् ।
गुरुसेवनतत्परोऽभवद्भगवाञ्शङ्करदेशिकश्चिरम् ॥ ५७ ॥
अतिनीलमहाम्बुदव्रजैर्दिवसे सन्तमसं प्रसारयन् ।
बधिरीकृतविष्टपारवैरथ वर्षर्तुरुपागतोऽभवत् ॥ ५८ ॥
अतिसंख्यगिरीन्द्रवाहिनीजलसंमेलनवर्धितो महान् ।
विनिपातिततीरपादपप्रकरो नार्मदपूर आगमत् ॥ ५९ ॥
अवधार्य गुरोर्गुहां नदीजलपूरो विनिमज्जयिष्यति ।
इति शङ्करयोगिनाऽभितं निदधे स्वस्य तदा कमण्डलुः ॥ ६० ॥
करकेण महामुनेः क्षणान्निखिलं पीतमभून्नदीजलम् ।
तदवेक्ष्य महाद्भुतं गताः मुनयो नार्मदतीरवासिनः ॥ ६१ ॥

चिरकालसमाधितो गुरुं तदनुव्युत्थितमूचिरे जनाः ।
भगवन्नखिलं नदीजलं तव शिष्यः करकेन्यवेशयत् ॥ ६२ ॥
इति शिष्यकथां जनान्मुनिः श्रुतवान्संमदमाप निस्तुलम् ।
अथ शिष्यमुवाच निर्मदं स्थितवन्तं रचिताञ्जलिं पुरः ॥ ६३ ॥
तुहिनाद्रितटेऽत्रिणा पुरा विदधे वत्स महान्मखस्तदा ।
दिविजा मुनयः समागताः सहशिष्यश्च पराशरात्मजः ॥ ६४ ॥
तमुपागतमत्रिरार्चयत्तमथो हेममयोन्नतासने ।
उपविष्टमशेषवेदिनं समपृच्छन्मुनयो बुभुत्सितम् ॥ ६५ ॥
शमितेषु तदीयसंशयेष्वहमाचार्यवरस्य संनिधिम् ।
उपगम्य नमस्कृताञ्जलिर्भगवन्तं तमिदं व्यजिज्ञिपम् ॥ ६६ ॥
भगवन् भवताऽमृतपदश्रुतिशीर्षार्थविनिर्णयाय यत् ।
परसूत्रकदम्बकं कृतं तदभूत्स्वार्थविबोधनाक्षमम् ॥ ६७ ॥
कुधियो बुधमानिनो यतस्त्वदभिप्रायविबोधवर्जिताः ।
अतिवाग्मितयार्ऽचिता जनर्विपरीतार्थमवर्णयन्नदः ॥ ६८ ॥
तदशेषकुभाष्यदूषकं निजभावस्फुटनाधुरंधरम् ।
निजमात्रवरस्य सुन्दरं भवता भाष्यवरं विधीयताम् ॥ ६९ ॥
अथ सत्यवतीसुतो दयाशिशिरां मय्यभिपातयन् दृशम् ।
शमयन् दरहासचन्द्रिकाप्रसरैस्तापभरं जगाद माम् ॥ ७० ॥
करके सकलं महानदीसलिलं यो विनिवेशयिष्यति ।
तव शिष्य उदारधीस्तथाविधभाष्यं विमलं विधास्यति ॥ ७१ ॥
तदितो व्रज शाम्भवं पुरं कुरु भाष्यं शुकतातसूत्रगम् ।
इति तत्र महेशशासने सति भाष्याय यतस्व तादृशे ॥ ७२ ॥
गुरुणेति समीरितो व्यथाभरतो मौनमवाप शङ्करः ।
अथ तं गुरुरुक्तवान्वचो मम कस्मादकृथा निरुत्तरम् ॥ ७३ ॥
भगवंस्तव विप्रयोगजां न विसोढुं कुशलोऽस्म्यहं व्यथाम् ।
तदभूवमहं निरुत्तरो दिश मे त्वत्पदसंनिधौ स्थितिम् ॥ ७४ ॥
तव मन्निकटे निवासतो मम शिष्टेरनुवर्तनं परम् ।
यदिदं जगतः प्रयोजयत्यमृतं तं गुरुरुक्तवानिति ॥ ७५ ॥
भगवानथ शङ्करो गुरुं प्रणमन् संपरिपृच्छ्य निर्ययौ ।
दिवसैः कतिभिश्चिदासदत्पुरमीशस्य सुरापगान्वितम् ॥ ७६ ॥



स्नात्वा भगीरथमहीपतिना तपोभि। रासादिते वसुमतीं पयसि द्युनद्याः ।
विश्वेश्वरं विरचितापचितिं प्रणम्य। काश्यां परां मुदमवाप यतिप्रबर्हः ॥ ७७ ॥

यद्धीर्जगज्जातमिवासुरारेस्तनूरखेदाभृतशास्त्रजातम् ।
त्रिविक्रमाभिख्यतदात्मजन्मा यः पार्वतीनन्दनतामयासीत् ॥ ७८ ॥

नीलकण्ठेन तेनास्मिन शङ्कराभ्युदयाभिधे ।
कृते काव्ये द्वितियश्च सर्गः संपूर्णतां गतः ॥ ७९ ॥

इति श्रीशङ्कराभ्युदयाख्ये काव्ये द्वितीयः सर्गः संपूर्णः ॥
श्रीमहात्रिपुरसुन्दर्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

**॥ अथ तृतीयसर्गप्रारम्भः ॥**

तत्राथ शङ्करमवाप सनन्दनाख्यः। कश्चिद्द्विजोऽध्ययनभावितवेदशास्त्रः।
व
आद्याश्रमी दृढविरागयुतो विनीतः। स्वाचारवान् प्रणतवांश्च यथाविधानम् ॥ १ ॥
विप्र क्व ते निवसतिस्त्वमिहागतोऽसि। कस्मै फलाय गुरुरेवमपृच्छदेवम् ।
सोऽप्यब्रवीन्निवसतिर्मम चोलनाम्नि। देशे मदागमनफलं तु तवानुवृत्तिः ॥ २ ॥
भीतोऽस्मि संसरणतस्तदपैति तत्त्व–। ज्ञानात्तदुद्भवति गुर्वनुवर्तनेन ।
वैराग्यदार्ढ्यमथ तस्य परीक्षमाणः। श्रीशङ्करो निगदति स्म सनन्दनाख्यम् ॥ ३ ॥
पद्माननोऽपि मदनेन विमोहितोऽभूत्। तं तादृशो विजयते कथमल्पसारः।
ज्ञानं दुरापमविनिर्जितमन्मथेन। तस्माद्विमुञ्च परतत्त्वविबोधवाञ्छाम् ॥ ४ ॥
ऊचे द्विजो विषयजातमनित्यमल्प–। सौख्यं दुरासदविपन्निवहप्रदं च।
इत्यस्ति धीः सकलमानवभाग्यमेषा। सन्तापयेन्न मदनः प्रभवेदमुष्मिन् ॥ ५ ॥
एवं वदन्तमवधार्य विरागदार्ढ्य–। भाजं सनन्दनमयं भगवाननैषीत्।
तुर्याश्रमं तदनु तत्त्वमुपादिशत्त–। द्यज्जानतां जनिजरामृतयो न सन्ति ॥ ६ ॥
साक्षात्कृतक्षपितभेदपरात्मतत्त्व–। मेनं सनन्दनमपेतविपत्प्रवाहम्।
कृत्वा गुरुः प्रमुमुदे न हि तादृशानाम्। लोकोपकारमपहाय परः पुमर्थः ॥ ७ ॥
अन्येऽपि ये दिविषदां प्रवरा महेशम्। श्रीशङ्कराख्यमधिभूमिकृतावतारम्।
संसेवितुं जनुरयान् भुवि तेऽपि काश्याम्। प्रायेण शङ्करमुनेरभवन्विनेयाः ॥ ८ ॥
प्राप्याऽप्यभेदमगुणेन परेण पुंसा। भूयो गुणा विरहिता अपि संख्ययाऽग्र्याः।
संख्यावतां समभवन्य इमे स्वशिष्याः। तैः शङ्करो विरुरुचे प्रमथैरिवेशः ॥ ९ ॥
स्नातुं कदाचिदथ शङ्करयोगिवर्यो। यास्यन् सुपर्वतटिनीं कमपि श्वपाकम्।
आयान्तमन्तिक उदीक्ष्य जगाद दूरम्। याहीत्युवाच तदनु श्वपचो मुनीन्द्रम् ॥ १० ॥
आनन्दचिद्वपुरविप्लवमद्वितीयम्। वस्त्वादिशन्ति सकलश्रुतिमस्तकानि।
त्वं ग्राहयस्यखिलशिष्यगणानमूनि। स्वान्ताद्बहिस्तन कथं न ···रेति भेदः ॥ ११ ॥
एवं वदन्तमवदत्स मुनिः श्वपाकम्। साक्षात्करोमि परतत्त्वमपेतभेदम्।
किं त्वाश्रमोचितमहं विदधामि लोकान्। स्वाचारतोऽपि शुभवर्त्मनि चारयिष्यन् ॥ १२ ॥

तद्याहि दूरमिति भाषितवान्भवन्तम्। स क्षम्यतामयि महापुरुषापराधः।
योऽध्यक्षयेत परतत्त्वमयं श्वपाको। विप्रोऽथ वाऽस्तु मम सद्गुरुबुद्धिरस्मिन् ॥ १३ ॥
यद्गृह्यतेऽहमिति सर्वशरीरवृन्दैः। देहेन्द्रियार्थकरणैर्निजभाविभास्यैः।
यच्छाद्यते यदवबोधवतां प्रमोद–। स्यांशा सरोरुहभवादिमहाप्रमोदाः ॥ १४ ॥
श्रीशङ्करे गिरमितीरयति श्वपाकः। सोऽन्तर्दधे तुहिनदीधितिकोटिकान्तिः।
सेवापराखिलसुरप्रवरानुयातो। दृग्गोचरोऽजनि मुनेस्तरुणेन्दुमौलेः ॥ १५ ॥
तं वीक्ष्य संमदभवं प्रतिपद्यमानः। साष्टाङ्गपातमभिवन्दितवान्मुनीन्द्रः।
उत्थाय पाणियुगलं मुकुलीकृतं मू–। र्ध्न्याधाय तन्निहितदृष्टि नुनाव भक्त्या ॥ १६ ॥
पुंस्त्ववंतोद्भवदुपायतरङ्गिणीनाम्। यां ज्ञानजह्नुतनयामविशत्सहस्त्रम्।
यं त्वां पयोनिधिमुपैत्यतिनिर्मला सा। तस्मै नमोऽस्तु भवते परमेश्वराय ॥ १७ ॥
आत्मप्रसूतजगदण्डततीर्यदीयं। मायोरगी पुनरपि ग्रसते क्षणेन।
यद्दंशनात्तनुधरा असकृन्म्रियन्ते। ज्ञानामृतं तव न ये समुपाजुषन्त ॥ १८ ॥
येन त्वया विनिहितं पुरतस्तृणंच। दग्धुं त्रिलोकधगपि क्षमते स्म नाग्निः।
तूलीकृताम्बुजभवाण्डगणोऽपि वायुः। कुप्येत्सखेति किमु नोच्चलयांचकार ॥ १९ ॥
यं स्वानुचिन्तनकृतो विदधानमाशु। नीरागरोषमनसोऽपि वशीकरोति।
अन्तर्गतान्यविषयेषु महत्सु रागो। रोषोऽपि तेष्वपकृतामसतां गणेषु ॥ २० ॥
एवं स्तुवन्तमखिलेश्वर आबभाषे। श्रीशङ्करं विनयशालिनमादरेण।
वेदान्ततो गलितभेदपरात्मतत्त्व–। ज्ञानाद्विमुक्तिमुपयाति जनोऽन्यथा नो ॥ २१ ॥
तात्पर्यबोधरहितस्य न वाक्यतोऽर्थः। बोधो भवेदिति विभाव्य पिता शुकस्य।
अद्वैततत्त्वपरतां निगमान्तवाचाम्। निर्णाययन्नकृत यत्किल सूत्रजालम् ॥ २२ ॥
अर्थप्रमास्य जनदुर्लभतामयासीत्। भाष्यैरसद्भिरसतां प्रतिपाद्यमाना।
त्वं वत्स तद्रचय सात्यवतेयसूत्र–। भाष्यं निरस्तकुमतं जगतां हिताय ॥ २३ ॥
एवं निगद्य दृगगोचरतामयासीत्। लोकेश्वरस्तदनु शङ्करयोगिवर्यः।
विश्लेषतो भगवतो व्यथमानचेताः। कृत्वाह्निकं सुरसरित्यगमन्निवासम् ॥ २४ ॥
अन्येद्युरंशुमति पूर्वधराग्रभाजि। श्रीशङ्करो विरचिताह्निक ईश्वरेण।
आज्ञप्तमारचयितुं त्वरितं जगाम। शिष्यैःसमं कतिपयैर्बदरीवनाय ॥ २५ ॥
गत्वा प्रशान्तदुरितं बदरीवनं त–। न्नारायणं नरमपि प्रथितानुभावौ।
अंशौ जगत्रयगुरोरवचाय्य विष्णोः। साकं मुनिर्मुनिजनैश्चिरमध्युवास ॥ २६ ॥
व्यासात्मना भगवता दनुजान्तकेन। सूत्राणि यानि रचितानि चकार तेषाम्।
भाष्यं स शङ्करमुनिः श्रवणेन यस्य। संसारतापमतितीर्य जनः सुखी स्यात् ॥ २७ ॥
देवैः परं भुवनपुण्यमयैः कृपाब्धेः। निर्मन्थिताद्विजयसंज्ञकमन्दरेण।
गीताभिधं यदमृतं समभून्मुरारे–। स्तन्व्याचकार भगवानथ शङ्करार्यः ॥ २८ ॥
भाष्याणि वेदशिरसां च सनत्सुजात। गीतादिकस्य च चकार बहून्प्रबन्धान्।
अन्यांश्च सोऽयमुपदेशसहस्रिकादीन्। मध्योत्तमाधमजनेऽनुजिघृक्षमाणः ॥ २९ ॥



प्रातिष्ठताथ बदरीवनतो महात्मा। तत्र स्थितान्मुनिजनान् परिपृच्छ्य सर्वान्।
आसादयत्स पुरवैरिपुरं स्वभाष्या–। ण्यध्यापयच्च निजशिष्यगणान्विनीतान् ॥ ३० ॥
तेषां सनन्दनमुनिस्त्रिरधीतसर्व–। स्वाचार्यभाष्य उद्‌वाह मतिप्रकर्षम्।
ऐर्ष्यंत्सतीर्थ्यनिवहोऽथ सनन्दनाय। तज्ज्ञातवानखिलवित्प्रवरो मुनीन्द्रः ॥ ३१ ॥
आवेदयन्मुनिवरो निजशिष्यवर्गान्। सेर्ष्यान्सनन्दनमुनेर्गुरुभक्तिरग्र्याम्।
तं जाह्नवीपरतटस्थितमाजुहाव। शीघ्रं सनन्दन ममान्तिकमाप्नुहीति ॥ ३२ ॥
श्रुत्वा सनन्दनमुनिः स्वगुरोर्गिरं ताम्। आयान्तुमैच्छत नदीजलवर्त्मनैव।
यत्र न्यधित्सत पदं सलिले स तत्र। गङ्गादृतं कमलमुद्गमयांचकार ॥ ३३ ॥
तेष्वम्बुजेषु विनिधाय पदे स एत्य। स्वाचार्यसंनिधिममुं शिरसा ववन्दे।
शिष्याः सनन्दनमुनेर्गुरुभक्तिसारम्। तत्कर्मणा बुबुधिरेऽथ जहुस्तदीर्ष्याम् ॥ ३४ ॥
श्रीशङ्करं स्वमतदूषणमात्मभाष्ये। श्रुत्वा बुधाः कतिचनातुलिताभिमानाः।
आगत्य साकममुना व्यवदन्त ते स्म। मन्दा व्यजेष्यत स चापि बत व्यजेष्ट ॥ ३६ ॥
तं बालमेव कृतभूरिमहाप्रबन्धम्। वादोपशान्तनिबिडप्रतिवादिगर्वम्।
आलोक्य शङ्करमुनीन्द्रमतीव लोकाः। व्यस्मेषत त्रिपुरवैरिपुराधिवासा ॥ ३६ ॥
गङ्गातटे सकलशिष्यगणान् स्वभाष्या–। ण्यध्यापयन्तमथ योगिवरं कदाचित्।
कश्चिद्द्विजातिरुपगम्य जराप्रकम्पः। किं पाठयस्यपि यतिप्रवरेत्यपृच्छत् ॥ ३७ ॥
व
श्रीव्याससूत्रगणभाष्यमिदं प्रणीतम्। स्वेनैव पाठयति नो गुरुरित्यवोचन्।
शिष्या मुनेस्तदनु विप्रवरो बभाषे। श्रीशङ्करं किममृषा तव शिष्यवाक्यम् ॥ ३८ ॥
ओमित्युदीरयति शङ्करदेशिकेन्द्रे। विप्रो जगाद भगवत्कृतसूत्रजाते।
आस्ते तदन्तरपदोपहितादिभागम्। सूत्रं तदर्थमभिधेहि यतिप्रबर्हन् ॥ ३९ ॥
नत्वा गुरुं गुरुरुवाच स भूतसूक्ष्मो। जीवोऽन्यदेहगमने व्रजतीममर्थम्।
ताण्डिश्रुतिप्रकटगौतमजैवलीय–। प्रश्नोत्तरे प्रथयतोऽर्थ इयान्हि तस्य ॥ ४० ॥
प्राचीनपक्षमवलम्ब्य जरद्द्विजन्मा। सिद्धांतपक्षमुदितं मुनिशेखरेण।
व
आरब्धदूषयितुमात्ममतस्य रक्षाम्। कर्तुं यतिश्च ववृधे स महान्विवादः ॥ ४१ ॥
जाते तयोर्विवदतोर्दिवसाष्टकेऽपि। कस्यापि भङ्गविजयान्यतरो न जज्ञे।
वृद्धादिजातिवपुषा विवदन्महात्मा। व्यासः प्रसन्नहृदयोऽजनि शङ्करार्ये ॥ ४२ ॥
तत्सत्यवत्युदरसंभवमात्मरूपम्। नीलाम्बुवाहरुचिरं मृगचर्मवासः।
बिभ्रज्जटाः कनकपिङ्गरुचो दधान–। मक्षस्रजं सलिलपूरकमण्डलुं च ॥ ४३ ॥
आर्द्रावलोकशमितार्तजनोपताप–। मास्येन पूर्णशरदिन्दुनिराकरिष्णु।
शिष्यैश्चतुर्भिरनुयातमुदारमेधैः। श्रीशङ्करार्यनयनाध्वगतामनैषीत् ॥ ४४ ॥
श्रीशङ्करस्तममरेन्द्रललाटलग्न–। पादाब्जधूलिकमसद्दुरवापवीक्षम्।
उद्रिक्त भक्तिरभिवन्द्य गुरुं गुरूणाम्। व्यज्ञापयत्सविनयं रचिताञ्जलिः सन् ॥ ४५ ॥
आचार्यवर्य तव दर्शनकामना मे। कालं महान्तमवसद्धृदये तदद्य।
संपादितं करुणया भवतात्तमोनु–। त्तेनाहमद्य गतवान्फलवज्जनित्वम् ॥ ४६ ॥

तं व्याहरन्तमिति सात्यवतेय ऊचे। त्वां सद्गुणैकनिलयं जनतः शृणोमि।
प्रीतस्ततस्तव परं वितरीतुमीहे। याचस्व तं त्वमिति सोऽथ गुरुर्बभावे ॥ ४७॥
स्वामिन्नहं व्यतनिषं भवता विवादम्। स क्षम्यतामखिललोकगुरोऽपराधः।
त्वत्सूत्रभाष्यमहमारचयं यदेतत्। संशोध्यतां च करुणाजलधे त्वया तत् ॥ ४८॥
वर्षाणि षोडश विधातृकृतं मयाऽऽयु-। रद्यान्तमेति मम षोडशहायनोऽपि।
कुर्यास्तथा वपुरिदं मणिकर्णिकायाम्। जह्यां यथा तव मुखाम्बुजमीक्षमाणः ॥४९॥
तां शङ्करोक्तिमनुसंन्यगदीन्मुनीन्द्रो। वादस्तव प्रमदकृन्मम नापराधः।
भाष्यं त्वदीयमिदमस्तु समस्तदोषम्। प्राङ्निर्मितेर्मम गिराध्यगमद्गुरुस्ते ॥ ५० ॥
त्यागं तनोर्यमभिकामयसे स युक्तः। सोऽयं प्रचारमभजन्त हि ते प्रबन्धाः।
लोकोपकारपटवो न हि ते प्रचारम्। विन्दन्ति दुर्विदततेर्जयमन्तरेण ॥ ५१ ॥
तान्दुर्वदान्न हि जयेद्विबुधस्त्वदन्य-। स्तद्भो ददामि तव षोडशवर्षमायुः।
तेनासतां कृतजयो गमयन्प्रचारम्। ग्रन्थान्निजान् निजपदं प्रति यास्यसि त्वम् ॥ ५२ ॥
अन्तर्हितः स भगवानिति वाचमुक्त्वा। श्रीशङ्करो गुरुवरस्य वियोगदुःखम्।
कालं महान्तमनुभूय गुरोर्निदेशा-। द्दुर्वादिसंप्रमथनोद्यतमानसोऽभूत् ॥ ५३ ॥
आदौ कुमारिलमशेषबुधाग्रगण्यम्। जेतुं प्रयागवसतिं स्पृहयालुचेताः।
प्राप्य प्रयागमतिनिम्नकलिन्दकन्या-। संभिन्नदेवतटिनीसलिले स सस्नौ ॥ ५४ ॥
स्तुत्वा प्रणम्य सकलाघहरां कलिन्द-। कन्यायितां त्रिपथगां विहिताह्निकोऽयम्।
तत्तीरपादपतले कृतविश्रमः सन्। आकर्णयद्यतिवरोऽद्भुतलोकवार्ताम् ॥ ५५ ॥
शास्त्रेषु येन स किमप्यविबुद्धमासीत्। प्रामाण्यभाक् श्रुतिगणो यदि गात्रभङ्गः।
मा भूद्गिरेर्निपततो मम तारमेव-। मुद्घुष्य योऽद्रिपतितोऽपि स भग्नगात्रः ॥ ५६ ॥
वादे पराजयमुपैष्यति यः स यन्त्रे। निष्पेषमेष्यति शिलातल इत्यभीर्यः।
कृत्वा पणं स्वविजितान् सुगतांश्चकार। यन्त्रे निविष्टवपुषो जगतो हिताय ॥ ५७ ॥
यस्याखिलश्रुतिगिरां समहाश्रुतीनाम्। प्रामाण्यमाहितवतो द्विजनिश्चयेषु।
दुर्वादिनामसुविधानजयार्जितेन। द्यौरध्वरो हि यशसा सह यज्ञधूमैः ॥ ५८ ॥
सोऽयं कुमारिलसुधीः स्वकृताघशान्त्यै। प्राविक्षदक्षतधृतिस्तुषराशिवह्निम्।
वार्तामिमां निशमयन्यतिसार्वभौमः। क्षिप्रं तदन्तिकमवाप सशिष्यवृन्दः ॥ ५९ ॥
अम्लानकान्तिवदनं धृतिगौरवेण। संविष्टमन्तमपि तीव्रतुषाग्निमध्ये।
शिष्यैः प्रभाकरमुखैर्व्यथितैरवाप्त-। प्रान्तं कुमारिलबुधं यतिराड् ददर्श ॥ ६० ॥
धीरः कुमारिलसुधीर्यतिवर्यमारात्। दृष्ट्वा शशास परिपूजनमस्य शिष्यान्।
सोऽप्येत्य संनिधिमवाप्य च तत्सपर्याम्। भट्टं कुमारिलमुवाच कृतावधानम् ॥ ६१ ॥
त्वां पण्डिताग्र्यमवकर्ण्य निरभ्यसूयम्। भाष्यस्य मद्विरचितस्य विधापयिष्यन्।
टीकां त्वया सकलभावविबोधकर्त्री-। मत्रागतोऽस्मि कुरु तामतिसूक्ष्मबुद्धे ॥ ६२ ॥
गात्रं तव प्रकृतिभाग्विदधामि वह्नि-। प्लुष्टं कमण्डलुजलेन करोक्षितेन।
एवं निगद्य करकाम्बुसमुक्षणेन। क्षिप्रं तनूं प्रकृतिभावममुष्य चक्रे ॥ ६३ ॥



भट्टोऽथ शङ्करमुनेः परिगृह्य भाष्यम्। पाणिद्वयेन नयने गमयन्नमुष्य।
वीक्ष्यैकदेशमवधारिततद्गुणौघः। ऊचे मुने त्वमसि सूत्रकृदेव नूनम् ॥ ६४ ॥
नो चेत्कथं नु पटिमेदृशभाष्यसृष्टौ। व्याख्यास्यते बुधजनोऽतिनिशातबुद्धिः।
भाष्यं त्वदीयमहमस्य विधाय टीकाम्। कीर्तिं भजे यत इदं सुकृतं न मेऽस्ति ॥ ६५ ॥
आश्रित्य जैमिनिमतं स्वकृतान् प्रबन्धान्। अध्याप्य शिष्यनिवहं प्रतिपन्नकीर्तिः।
जल्पन्विरुद्धमतिनास्य जनैर्विहस्यै। श्रद्धा च मुञ्चति मदीयवचांसि नृणाम् ॥ ६६ ॥
किं च श्रुतिं त्यजति सौगतमार्गलग्ने। प्रायोजने सुगतदुर्मतखण्डनेन।
संचारयन् श्रुतिपथे मनुजानबुध्ये। गूढो गुरोः सुगततः समयं तदीयम् ॥ ६७ ॥
देहं पिनष्टु नृपतिर्विजितस्य वादे। यन्त्रे विधाय पणमेतमतीव घोरम्।
जित्वा गुरुं सुगतमारचयं निविष्टम्। यन्त्रे ममैकमिदमस्त्यतिघोरमंहः ॥ ६८ ॥
अन्यच्च जैमिनिमतं श्रयता मयेशो। नास्तीत्यवादि यदयं श्रुतिलोकसिद्धः।
पापद्वयक्षयकृते तुषराशिवह्निम्। प्राविक्षमुत्थितिरितो न हि रोचते मे ॥ ६९ ॥
विद्वत्तयाऽहमपि यत्समतां न विन्दे। तं मण्डनाख्यविबुधं जयिशिष्यभावम्।
वादे जितस्य पणयन्विजयस्व वादे। भाष्यस्य ते स रचयिष्यति साधु टीकाम् ॥७०॥
आज्ञाक्षर्ति मदपराधमिमं क्षमित्वा। तद्ब्रह्म शान्तमुपदिश्य कृतार्थयेर्माम्।
यज्जानतां जनिजरामृतयो न सन्ति। पद्मासनासुगममाप्नुवतां प्रमोदम् ॥ ७१ ॥

इत्युक्त्वा मुकुलीकृतकरयुगसंघटितनिटिलतटः।
प्रणनाम शङ्करमुनिं कारुण्यनिधिं स पण्डितवरेण्यः ॥ ७२ ॥

अथ शङ्करदेशिकोपदेशक्षपितस्वान्तमलः स पण्डिताग्र्यः।
अपरोक्षितनिर्मलात्मतत्त्वस्तनुमुत्सृज्य ययौ पदं मुरारे ॥ ७३ ॥
यद्धीर्ज्जगज्जातमिवासुरारेस्तनूरखेदाभृतशास्त्रजातम्।
त्रिविक्रमाभिख्यतदात्मजन्मा यः पार्वतीनन्दनतामयासीत् ॥ ७४ ॥

नीलकण्ठेन तेनास्मिन् शङ्कराभ्युदयाभिधे। कृते काव्ये तृतीयश्च सर्गः संपूर्णतां गतः ॥ ७५ ॥

॥ इति श्रीशङ्कराभ्युदयाख्ये काव्ये तृतीयः सर्गः संपूर्णः ॥
श्रीमहात्रिपुरसुन्दर्यै नमः ॥ श्रीगुरुभ्यों नमः ॥

**॥ अथ चतुर्थसर्गप्रारम्भः ॥**

माहिष्मतीमथ सतां नगरीं प्रतस्थे। या मण्डनद्विजपतिक्रियमाणवासा।
स्वं मण्डनं द्विजपतिं चिरविप्रयुक्तम्। दृष्ट्वैव तद्विरहदुःखमपाकरिष्यन् ॥ १ ॥

रेवातीरगतामुपेत्य नगरीं तां नर्मदायां मुनिः।
निर्वर्त्याह्निकमध्वखेदमजहत्तीरद्रुमच्छायभाक्।
चिह्नं मण्डनवेश्मनोऽथ सरणिं पप्रच्छ तीरस्थिता-।
-नुक्त्वा मार्गममुष्य चिह्नमथ ते प्रोचुर्यतीन्द्रं प्रति ॥ २ ॥
प्रामाण्यं स्वत आगमस्य फलदं कर्म ध्रुवं विष्टपम्।
कर्मण्यागमतत्परत्वमिदमाद्यातिष्ठमानैः शुकैः।
कैश्चित्पञ्जरबन्धुरे विदधते यद्दारशालान्तरे।
व
ते न्येवाथमवेहि मस्करिपते तं मण्डनस्यालयम् ॥ ३ ॥

श्रीशङ्करो मण्डनमन्दिरस्य। द्वारं समासाद्य कपाटरुद्धम्।
योगप्रभावेन तदङ्गणान्त–। रवातरद्व्योमपथेन सद्यः॥ ४॥
व

निमन्त्रितव्यासमुनीन्द्रजैमिनिस्तपःप्रभावादथ पित्र्यकर्मणि।
प्रवर्तमानो यतिविद्विषां वरः स मण्डनः कर्मपरस्तमैक्षत॥ ५॥

विघटयति द्विविधानपि गृहानयं श्रीमत इतीव।
क्रुद्धस्य मण्डनस्य च यतिराजश्चाभवन्मिथो भाषाः॥ ६॥
आ मुडी कुत आगलात्तव सृतिं पृच्छामि सा स्माह किम्।
माता ते कुलटेति वेत्ति कुलटाभावं जनन्यास्तव।
पन्था अप्यहह त्वदीयजननीत्युक्ता कथं युष्मदः।
प्रष्टार्थः प्रतिवाक्यगस्य किमभूत्पीता सुरा नो सिता॥ ७॥
हालाया अपि वेत्सि वर्णमयि भो वर्णं परं नो रसम्।
त्वद्वन्मत्त उदीरयत्ययमसज्जातः कलञ्जाशनः।
त्वज्जस्त्वं पकळञ्जमत्ति वहतः कन्थामनीषद्वहाम्।
बाले येन शिखोपवीतवहने भारः कियान् स्यात्तव॥ ८॥
त्वत्पित्राऽप्यतिदुर्भरामहमिमां कन्थां वहे सन्त्यजन्।
भारः स्यात्सुमहान् श्रुतेरिति शिखायज्ञोपवीते उभे।
दारान्भर्तुमशक्तितो गतवतो गार्हस्थ्यमात्मज्ञता।
व्याख्याता बत शिष्यपुस्तकगणस्फीताभिलाषस्य ते॥ ९॥
आचार्यस्य निषेवणालसतया कृत्वा समावर्तनम्।
निष्ठा कर्मणि ते स्फुटा जडमते दारव्यवायैषिणः।
याभिस्ते जनिरर्पिताऽप्युपचितिस्ताः स्त्रीः कथं गर्हसे।
तासु स्त्रीषु कथं भवान्पशुरिव प्रावर्तत क्रीडितुम्॥ १०॥
पापं वीरवधोचितं त्वमभजो वैश्वानरोद्वासनात्।
अज्ञात्वा परमं पदं विगलितद्वैतं स्वसंवित्सुखम्।
आत्मघ्नो दुरितं गतोऽपि मरणं भूयः समासादयन्।
नांशः कोटितमोऽपि यस्य भविता तद्वीरहत्याशतम्॥ ११॥
द्वारस्थान्वञ्चयित्वा कथमिह भवने प्राविशः स्तेनवत्त्वम्।
भिक्षुभ्योऽन्नान्यदत्वा कथमिव रहसि स्तेनवत्पाप भुङ्क्षे।
कर्मानेहस्य संभाष्य इह जडमतेर्मे यतेर्भङ्गतस्ते।
पाण्डित्यं स्पष्टमासीदभिमयतिभङ्गस्य कार्यो हि मे सः॥ १२॥
यतिपदं यतिभङ्गपदे स्थितं त्वदुदिते भवतु प्रकृतिर्जसेः।
यदि जसः प्रकृतित्वमियात्तथा भवतु कर्तरि नैव स कर्मणि॥ १३॥



क्व ब्रह्म क्व जडाशयः क्व च कलिर्न्यासः क्व कर्मन्दिनाम्।
वेषं स्वाद्वशनस्पृहापरवशस्त्वं धारयामासिथ।
क्व स्वर्गः क्व कुकर्मकृत्क्व च कलिः पापोऽग्निहोत्रं क्व च।
स्त्रीसंभोगसुखेच्छयैव भवता गार्हस्थ्यमालम्बितम्॥ १४॥
सक्रोधमण्डनसहासयतीन्द्रयोस्ताम्। व्यासो निशम्य वचनावलिमाबभाषे।
भो मण्डनापचितियोग्यममुं यतीन्द्र–। म(भ्या)गतं प्रति कटूक्तिरसांप्रतं ते॥ १५॥
इति तद्वचनेन शान्तमन्युः समुपस्पृष्टजलोऽथ मण्डनस्तम्।
न्यममन्त्रत शङ्करं कटूक्तीः क्षमयन् स्वा अथ तं यतिर्बभाषे॥ १६॥
मण्डनाऽभिलषितो मम वादो नान्नमत्तुमहमागममत्र।
चेत्क्षमोऽसि जितजेतृविनेयाचार्यतापणमिमं दिश मह्यम्॥ १७॥
यद्यपि न यतेः कार्यो वादो नूनं तथापि गुरुशिष्टया।
व्याकुलिताम्नायान्तान् वादैर्जेतुं प्रवृत्तोऽस्मि॥ १८॥
नो चेद्वद न शक्नोमीत्यथ मण्डनपण्डितः। अवोचच्छङ्कराचार्यं प्रहसन्वैदुषीमदात्॥१९॥
न सहस्रमुखः सहस्रदृग्गुरुरप्याननतो वचो मम।
अहमस्य पटुर्विवाद इत्यलमुद्भावयितुं परे किमु॥ २०॥
न गवामभिवर्षणैः सहस्रं विबुधेन्द्रा अपि मण्डनोषरोर्व्याम्।
मिलिताश्च पराजयाङ्कुरस्य प्रभवं कर्तुमलं भवान्कथं स्यात्॥ २१॥
कालाद्बहोर्मे हृदये विवादवाञ्छाऽस्ति नाद्यावधि कोऽपि लब्धः।
विवादयोग्योऽद्य भवानिहागात्कथं न दद्यां भवते विवादम्॥ २२॥
वाञ्छानुरूपो भवतो विवादः श्वः स्याद्दिनेऽस्मिन् पितृकर्म कार्यम्।
कुर्वे मदीयां सफलीकुरुष्व निमन्त्रणां भो यतिसार्वभौम॥ २३॥
इत्युक्त्वा शङ्कराचार्यः स्वीकारितनिमन्त्रणः। निर्वर्तयामास यथाशास्त्रं श्राद्धक्रियां सुधीः॥ २४॥
भुक्तोपविष्टा मुनयस्त्रयोऽमी उपासिता नालदतालवृन्तैः।
शिष्यैस्तदीयैः प्रमदं मुहूर्तमन्योन्यसंलापजमन्वभूवन्॥ २५॥
अथ जैमिनिबादरायणौ व्यवधित्सू वदति स्म मण्डनः।
यतिना विवदे समं भवन्तौ श्रयतं भो इह मध्यवर्तिताम्॥ २६॥
श्रीमांस्तत्र पराशरस्य तनयो मध्यस्थतां देहि भो।
भार्यायै तव सा हि मानुषवपुच्छन्ना गिरां देवता।
तस्यां शङ्करपक्षपातमणुमप्याशङ्कथा मा स्म भो।
इत्युक्त्वा सह जैमिनिर्नयनयोः पन्थानमत्यक्रमीत्॥ २७॥
श्रीशङ्करो मण्डनपण्डितस्य वृत्तं गृहे सर्वमुदीर्य शिष्यान्।
देवालये क्वापि नदीतटस्थे निषामनैषीत्स दिनावशेषाम्॥ २८॥
परे द्यवि प्रातरयं मुनीन्द्रः कृताह्निको मण्डनपण्डितश्च।
सभामयातां बुधवृन्दपूर्णां समानशिष्या उभयोश्च शिष्याः॥ २९॥

माध्यस्थतां तदनु वागधिदेवतां ताम्। वादे जितस्य च पणं जयिशिष्यभावम्।
जेत्राश्रमस्य वहनं च वितेनतुस्तौ। पश्चाद्यतिः स्वमतगामकरोत्प्रतिज्ञाम् ॥ ३० ॥

चिद्रूपं परमार्थसत्परसुखं ब्रह्मैव विश्वात्मना।
रज्ज्वंशो रजतात्मनेव पिहितं स्वाविद्यया भासते।
अज्ञानं गिलतः स तज्जभुवनं तज्ज्ञानतो मुक्तता।
विध्वस्तावरणं तदेव करणं तत्र श्रुतेर्मस्तकम् ॥ ३१ ॥

शङ्कराचार्यवर्यस्य प्रतिज्ञां निशमय्य ताम्।
मण्डनोऽप्यकरोद्धीमान् प्रतिज्ञां स्वमतानुगाम् ॥ ३२ ॥

सिद्धे कार्यान्विते सप्रमितिकरणता वेदमूर्ध्नामसङ्गे।
ब्रह्मण्यप्राप्तशक्तौ सममपि हि पदं सङ्गतं कार्ययुक्ते।
पूर्वं काण्डं तु कार्ये प्रमितिकरणतां याति कर्मभ्य इष्टम्।
निर्वाणं कर्मणां चावधिरिह मरणं स्यादनुष्ठातृतायाः ॥ ३३ ॥

एवं प्रतिज्ञाप्य तयोर्विवादे प्रवृत्तयोर्मण्डनधर्मपत्नी।
मालां गले न्यस्य जितस्य माला शुष्यत्युदीर्येति ययौ गृहान्तः ॥ ३४ ॥

मानाधिकावुपगतावतिसूक्ष्मदृक्तामाक्षिप्तहस्तमथ शङ्करमण्डनाख्यौ।
कान्तारपत्तनगजप्रवरौ महान्तं वाग्दन्तघट्टनमयं समरं व्यधाताम् ॥ ३५ ॥

अस्विन्नगात्रमविकम्पमवाच्यमानमावेक्ष्यमाणगगनं च तयोर्विवादः।
योऽभून्न तत्र महता समयेन चापि कस्यापि भङ्गविजयानुमयापि जज्ञे ॥ ३६ ॥

कैश्चिद्दिनैरथ स मण्डनपण्डितः स्वपक्षस्थिरीकरणदाक्ष्यवियुज्यमानः।
श्रीशङ्करं प्रति समस्तविदं वितण्डारूपां पुरेति समुदीरयति स्म वाणीम् ॥ ३७ ॥

यते त्वया जीवपरशुद्धाभेदोऽभ्युपेयते। तत्र प्रमाणं किमपि नाऽस्माभिरधिगम्यते ॥ ३८ ॥
वेदावसानव्याहाराः सन्त्यसंख्या गृहाश्रमिन्। तत्र प्रमाणतापन्नास्त्वं त्वपुण्यान्न बुध्यसे ॥ ३९ ॥
जपार्थास्तत्त्वमस्याद्या यथा वा हुंफडादयः। नाभिधेयविशेषोऽस्ति विवक्षासां गिरां यते ॥ ४० ॥
जपैकफलता हुंफडादीनामस्तु ते यतः। अर्थाप्रत्यायकास्तत्त्वमस्यादीनां तु साधकम् ॥ ४१ ॥
नाभेदपरता तत्त्वमस्यादेरीशजीवयोः। यष्ट्(व)प्रशंसया किं तु मस्करिन्विधिशेषता ॥ ४२ ॥

आदित्यो यूप इत्यादेः कर्मकाण्डगतस्य सा।
स्यादतत्काण्डिनस्तत्त्वमस्यादेः स्यात्कथं गृहिन् ॥ ४३ ॥

इत्यादिकाक्षेपसमाधिवाचां तयोर्द्वयोः स्पष्टवतोः प्रवाहम्।
यतीन्द्रमेकोपगता जयश्रीः पराजयश्रीश्च गृहाश्रमीन्द्रम् ॥ ४४ ॥

बाणयुद्धे विश्वरूपविजितः प्राक् स शङ्करः। बाणयुद्धे विश्वरूपं विजित्य निरयातयत् ॥ ४५ ॥

म्लायत्यवाप्य कुसुमं तनुमस्य हीति। बुध्येव मण्डनमसंस्पृशती तदानीम्।
म्लानस्रजं सुरकरच्युतपुण्यपङ्क्तिः। श्रीशङ्करे विनिपपात गलन्मरन्दा ॥ ४६ ॥

याता सुरेश्वरपदं यत एष पक्ष–। पातादिवाऽत्र दिविजास्तदमुष्य मौनम्।
अन्यप्रयुक्तमवबोधयितुं तदानीं। लोकं स्वदुन्दुभिरवैः समपूरयन्त ॥ ४७ ॥



पूतद्विजास्यभवशङ्करवर्णवर्णान्। नृत्यत्सुरीचरणनूपुरकिंकिणीनाम्।
नादांश्च तत्र जनताश्रवणे समानम्। संस्थापयन्त्यजनि नो उचितज्ञताभाक् ॥ ४८ ॥

आगत्य मण्डनवधूरथ मण्डनस्य। म्लानां गलस्त्रजमवेक्ष्य पराजयज्ञा।
भिक्षार्थमुच्चलत भो इति तं जगाद। भिक्षुं च भिक्षुमिव तत्परवासरेषु ॥ ४९ ॥

पराजयात्स्वात्प्रथमोदिताद्यथा–। मवाप यां जैमिनिपक्षखण्डनात्।
ततोऽधिकान्तामधिगम्य दुःसहाम्। यतीन्द्रमेवं निजगाद मण्डनः ॥ ५० ॥

यदि ते समयो मतः श्रुतेर्ऋतवाचां प्रथमः स जैमिनिः।
श्रुतिवित्प्रवरो मतस्य ते विपरीतं कथमास्थितोऽभवत् ॥ ५१ ॥
अथ जैमिनिसंमतं मतं निजमावेदयतोपपत्तिभिः।
बहुभिर्यतिराट् स मण्डनो न हि तेनापि मुमोच संशयम् ॥ ५२ ॥
अथ मण्डनचिन्तितो मुनिर्भगवाञ्जैमिनिरेत्य संनिधिम्।
यतिराण्मतमात्मनो मतं निजगादाऽथ जहौ स संशयम् ॥ ५३ ॥

अथ स्वतो मस्करिताग्रहोत्सुकं यतीश्वरो मण्डनमित्यवोचत्।
जितोऽपि जेतुर्मम शिष्यतां तथा यतित्वमप्याश्रय सत्यसंगर ॥ ५४ ॥

एवं स्वस्य पुरो मुनौ निगदति प्रोवाच वाग्देवता।
भर्त्रर्धं गृहिणीति हि श्रुतिवचोऽस्त्यस्मान्ममानिर्जये।
भर्ता मे न जितस्ततो मम जयं कृत्वा यतित्वं नयेः।
भर्तारं मम शङ्करोऽवददिमां सेहे विवादं स्त्रिया ॥ ५५ ॥

निर्दर्शिनीकृत्य ततः सा गार्गीयाज्ञवल्क्ययोः। विवादं रोचयामास स्वेन वादं यतीन्दवे ॥ ५६ ॥

अथाऽखिलज्ञाग्रसरः स मण्डनस्त्रिया विवादं सह शङ्करोऽकरोत्।
तया विवादो विदधे तथा यथा निजाखिलज्ञत्वमतिस्फुटं भवेत् ॥ ५७ ॥

दिवसान् सप्तदशाऽसौ व्युधाखिलवेदिना मुनीन्द्रेण।
अप्राप्तजया निरणयदात्मजयोपायमिति विचारेण ॥ ५८ ॥

शास्त्राणि वेद सकलान्यपि कामशास्त्र। वर्जं न तेषु विजयोऽस्य मयाऽधिगम्यः।
कामागमं तु न हि वेद यदेष बाल्ये। न्यास्थन्न चाऽप्यनियमस्तदिहैष जय्यः ॥ ५९ ॥

निर्णाय मण्डनवधूरिति भिक्षुराजम्। पप्रच्छ मन्मथकलाः कति किंस्वरूपाः।
किं न्वाश्रयन्ति धवले कथमन्यपक्षे। तासां स्थितिर्भवति यानि कथं युवत्याम् ॥ ६० ॥

श्रुत्वाऽचिन्तयदित्ययं सकलविच्छक्नोम्यमुष्योत्तरम्।
दातुं किं त्ववकीर्णितां मयि जनः शङ्केत दत्तोत्तरे।
विस्रम्भं मम वाक्ष्वः शिथिलयेत्तेनार्थहानिं भजे–।
न्नो चेदुत्तरदोऽस्मि मण्डनजयायाऽसौ वृथाऽयं भवेत् ॥ ६१ ॥

दत्तोत्तरत्वदोषस्य मृजाया अवधिं ततः। मासं ययाचे यतिराडनुमेने च भारती ॥ ६२ ॥

भारत्या सह मण्डनेषु च सभास्तारेषु पश्यत्स्वथो।
उत्पत्याम्बरसीम्नि योगबलतो गच्छन्स्वशिष्यैः सह।
योगीन्द्रः क्वचिदन्तभाजमवनीपालं रुदत्प्रेयसी-।
वन्दं वीक्ष्य सनन्दनं विनयिनं प्रोवाच शिष्यं मनिः ॥ ६३ ॥

बाल्ये प्रव्रजनादवेदिषमहं नो कामशास्त्रं परम् ।
भारत्या तनुतानुयोगमिह तन्मासोऽवधिः कल्पितः ।
एतस्योत्तरणे तदस्य नृपतेर्गात्रेऽविशं स्त्रीनिमा ।
भूञ्जानो मदनागमार्थमखिलं प्रत्येतुमभ्युत्सहे ॥ ६४ ॥

इति वदति गुरौ सनन्दनार्य- । स्तमिदमुवाच समस्तविद्वरेण्य ।
न किमपि भवतः परावबोध्यम् । तदपि जिहासति मां हठेन मौनम् ॥ ६५ ॥

मत्स्येन्द्रो नाम योगी भवति किल पुरा स स्वदेहस्य रक्षा- ।
—मादिश्य छात्रमेतं क्वचन धरणिभृत्कन्दरान्तर्विसृज्य ।
राज्ञः कस्यापि देहं मरणमितवतो योगशक्त्या प्रविष्टः ।
देवानामप्यलभ्यान्कतिपयदिवसानन्वभूत्तस्य भोगान् ॥ ६६ ॥

तद्राजामात्यमुख्या अनधिगतमथ प्राङ्मृतोज्जीवनाभ्याम् ।
वीक्ष्य व्रातं गुणानामिह कमपि महायोगिनं राजदेहे ।
ज्ञात्वाऽऽविष्टं पुनर्न स्वतनुमयमियादेनमिष्टा यथाऽयम् ।
व
रज्याद्युष्मासु राजा विरचयति तथे त्यादिशन्राजकान्ताः ॥ ६७ ॥

तासां विभ्रमसूचितां प्रणयितां स्वस्मिन्परां जानता ।
मत्स्येन्द्रेण दुरिन्द्रियार्थनिबिडप्रेमा स्वकीयं वपुः ।
योगश्चापि विसस्मरेऽस्य जनिवग्दोरक्षनामा ततः ।
तच्छिष्यो विचयेन तं नववपुः संछन्नमासादयत् ॥ ६८ ॥

तत्संहितस्मृतिरपि प्रमदानुराग- । संदानितेन मनसा न नृपालदेहम् ।
संत्यक्तुमैच्छदथ भूरिभिरभ्युपायैः । गोरक्ष एनमनयत्स्वतनुं क्रमेण ॥ ६९ ॥

तवाऽपि तादृग्व्यवसायभाजः । मन्ये भवेत्तादृगवस्त्तैव ।
इति ब्रुवन्तं यतिसार्वभौमः । सनन्दनार्यं पुनरप्युवाच ॥ ७० ॥

योगी परात्ममतिहीन उपैति सङ्गम् । दुष्टेन्द्रियार्थनिवहस्य यदीदृगस्य ।
स्यादुर्दशा मयि तु नैव विशङ्कनीया । सा तत्त्वधीविधुतमोहमहान्धकारे ॥ ७१ ॥

अन्यच्छरीरमनिविश्य कृतोत्तरं चेत् । कर्तास्मि मण्डनवधूरचितानुयोगम् ।
ज्ञात्वा तदा मलिनधीरवकीर्णिनं माम् । छात्रव्रतः शिथिलधर्ममतिर्विनश्येत् ॥ ७२ ॥

ताभ्यामेवं संवदद्भ्यामतीते गगनाध्वनि ।
महत्यद्रिवरः कोऽपि तयोः संनिहितोऽभवत् ॥ ७३ ॥

तस्याग्रमासाद्य सनन्दनादीन् शिश्यान् स ऊचेऽत्र गिरेर्गुहायाम् ।
विमुक्तदेहोऽन्यवपुः प्रविश्य मासादिहैष्य(अ)वतेह तावत् ॥ ७४ ॥

मूर्धन्यनाडीविवराध्वनः स्वात्प्राणानिलं गात्रत उत्क्रमय्य ।
तेनैव मार्गेण नृपस्य देहे प्रवेशयामास महामुनीन्द्रः ॥ ७५ ॥

अथोत्थितोऽभूदवनीमहेशस्तं वीक्ष्य राजप्रमदाजनस्य ।
मुखे विकासातिशयस्तदानीं चिह्नं रराज प्रमदाजनस्य ॥ ७६ ॥



युगपदभिहतानां पाणिकोणैर्नियोज्यैः । निनदमथ निशम्याऽनेकवाद्योत्तमानाम् ।
क्षितिभृदसुहरं स्वं क्रुद्धतत्सैनिकाना– । मभिसरणमशङ्कि स्वे कृतान्तेन लोके ॥ ७७ ॥

अथ नृपो मुदितैः सचिवादिभिः । प्रियवधूनिवहैश्च समन्वितः ।
समधिरुह्य मतङ्गजमात्मनः । नगरमेत्य विवेश गृहोत्तमे ॥ ७८ ॥

विसृज्य सर्वांश्च ततो यथोचितम् । स वेत्रहस्ताजनदर्शिताध्वना ।
प्रविश्य शुद्धान्तमवाप्तसंमदा । यथाक्रमं मानयति स्म ता वधूः ॥ ७९ ॥

दिने दिने स क्षितिपः पुरातनो । यदा यथा यन्व्यतनोत्तदा तथा ।
तदेव चक्रेऽर्धकृतं च तेन यत् । समापयामास तदेव सर्ववित् ॥ ८० ॥

परस्वभावश्रयणेन तेन । निजस्तिरोधापयितुं स्वभावः ।
इष्टोऽप्यभिव्यक्तिमविन्दतैव । स्वभावगुप्तेर्न हि कः प्रमाद्येत् ॥ ८१ ॥

दानक्षमासकलवित्त्वपुरोगमानाम् । वृन्दं निरीक्ष्य मुहुरत्र महागुणानाम् ।
पूर्वे नृपे त्वननुभूय तदीयमन्त्रि– । वर्गो ममन्त्रत मिथोऽथ विविक्तमेत्य ॥ ८२ ॥

मृतोऽरण्ये योऽस्मन्नरपतिरयं नैव नयतः ।
गुणास्तत्रासन्तो बहव इह वासं विदधते ।
प्रभौ किं त्वस्माकं मृतवति तदीये न विविशे ।
ध्रुवं योगी कश्चिद्वपुषि परिमुच्यात्मकरणम् ॥ ८३ ॥

एष यदात्मशरीरं पुनरपि न भजेदिहार्ऽस्त क उपायः ।
इति तत्र कश्चिदूचे पुनरन्यो व्याजहारेदम् ॥ ८४ ॥

सर्वे शवाः क्षितिगता दहनं प्रवेश्या– । स्तेष्वेतदीयमपि दाहमुपैति गात्रम् ।
लोपात्प्रवेश्य वपुषोऽयमिहैव देहे । याता स्थिर्ति सकललोकसुखं ततः स्यात् ॥ ८५ ॥

अभिनन्द्याऽस्य वचनं तदन्ये सर्वमन्त्रिणः ।
समस्तशवदाहाय शशासुः किङ्करान्बहून् ॥ ८६ ॥

ततोऽन्विष्यान्विष्य क्षितिगतशवस्तोममखिलम् ।
दहन् भृत्यव्रातो नरपतिरिवोज्जीवनमियात् ।
प्रमीतोऽन्योऽपीति क्षुभितहृदयत्वाच्छवगणम् ।
दहन्याम्यप्रेष्यव्रज इति किलावेदि मनुजैः ॥ ८७ ॥

अथाखिलां राज्यधुरां धराधिपो निवेश्य मन्त्रिप्रवरेषु तेष्वयम् ।
इयेष रन्तुं रतिकान्तमूर्तिभिर्वराङ्गनाभिः कुसुमायुधो नृपः ॥ ८८ ॥

सौधेष्वपास्ततिमिरेषु मणिप्रदीपैः । पूर्णेन्दुकान्तिरुचिरासु विभावरीषु ।
आस्तीर्णपुष्पशयने तपनीयमञ्चे । कान्तामणीररमयन्नरपालमौलिः ॥ ८९ ॥

ताभिर्वधूभिर्विहरन्नृपालो । निनाय बह्वीः क्षणवत्त्रियामाः ।
तदा वितेनेऽमरुकाख्ययैकम् । ग्रन्थं समेतं निजया रसाढ्यम् ॥ ९० ॥

अथ शङ्करदेशिकस्य शिष्याः । अवधेरप्यतिवर्तने गुरौ स्वे ।
अनुपागतवत्यतीव चिन्ता– । मुपजग्मुर्न्यगदीदमीषु कश्चित् ॥ ९१ ॥

गुरुभिः पुनरागमेऽवधिर्नः । कथितो योऽत्यगमत्समानरूपः ।
दिवसैः सह पञ्चषैर्न तेषा– । मधुनाप्यागमनं पुनर्बभूव ॥ ९२ ॥
स नो गुरूणामधुनाऽप्यनागमः । तदङ्घ्रिसान्निध्यनितान्तरागिणः ।
करोत्यविज्ञातविलम्बकारणा– । नुदग्रदुःखज्वलितान्तरात्मनः ॥ ९३ ॥
विचिन्महे वा कथमस्य विग्रहे । कृतप्रवेशां त्रिजगद्गुरून्वयम् ।
उपायमेतद्विपदो निवर्तने । न वेद्मि यो वेद वदेत्स एषु तम् ॥ ९४ ॥
तेषामेकतमस्मिन्नेवं भाषिणि सनन्दनमुनीन्द्रः ।
सञ्चारितनयनः । सन्सर्वेष्विदमीरयांचक्रे ॥ ९५ ॥
व्रजन्तमाचार्यमनुव्रजद्भिः । व्योमाङ्गणेऽस्माभिरवेक्षितं प्राक् ।
क्रन्दद्वधूवृन्दपरीयमाण– । मपि प्रमीतं स्मरथ क्षितीशम् ॥ ९६ ॥
सनन्दनाऽस्मिन्नृपतेः शरीरे । प्रविश्य कृत्वा समयं कियन्तम् ।
निवासमस्मिन्पुनरागमिष्या– । म्येवं तमालोक्य गुरुर्बभाषे ॥ ९७ ॥
ततो मरुद्भावितमन्यदेह– । प्रवेशदोषं बहुलं निरस्य ।
वाचं प्रयुञ्जान इमं क्षणेन । शैलेन्द्रमासादितवान्मुनीन्द्रः ॥ ९८ ॥
नूनं तमेव क्षितिपालदेहम् । भवेत्प्रविष्टो भगवान्गुरुर्नः ।
किंनामधेयो नृपतिः स किं वा । प्रशास्ति देशं न हि तत्तु वेद्मि ॥ ९९ ॥
तथाऽप्यमुं भूधरमन्तरेण । माहिष्मतीपत्तनमप्युदाराः ।
ये नीवृतः सन्ति चरद्भिरेषु । न शक्यतेऽस्माभिरवाप्तुमार्यः ॥ १०० ॥
मृतोज्जीवित एकस्मिंस्तेषां संश्रोष्यते नृपः ।
यो मृतोज्जीवितो राजा स एव किल नो गुरुः ॥ १०१ ॥
उपपत्तिमद्वचनमस्य शृण्वताम् । प्रमदातिरेककलितान्तरात्मनाम् ।
कतिचित्स्थिता गुरुशरीररक्षणे । कतिचित्तु निर्ययुरमुष्यलब्धये ॥ १०२ ॥
देशेषु तेषु कृतसंचरणा अथैते । प्राप्य क्रमादमरुकाख्यनृपस्य देशम् ।
धर्मेण तत्र गुरुनिश्चयमेत्य पश्चा– । दुज्जीवनं मृतवतो नृपतेरशृण्वन् ॥ १०३ ॥
सम्प्राप्य राजधानीं सर्वज्ञास्ते प्रदर्श्य नैपुण्यम् ।
गानकलायां प्रभुणा श्रुत्वाऽऽहूतास्तदन्तिकमुपायन् ॥ १०४ ॥
दत्तासनानथ विलोकनसंज्ञयैव । तान्पारिपार्श्वकमुखेन नृपोऽन्वयुङ्क्त ।
यूयं विलोकितचराः प्रतिभातयुष्म– । द्वासः क्व वा फलमिहागमनस्य किं वः ॥१०५॥
विज्ञापयन्तेऽथ नृपं स्म गायनाः । सच्छङ्करस्य प्रवरक्षमाभृतः ।
वासं विदध्मः सविधे पुरा मुदम् । नीताः परां तेन जहौ स्ववर्ष्म सः ॥ १०६ ॥
भवन्तमाकर्ण्य गुणैः प्रभोर्नः । समं समागम्य विलोक्य च त्वाम् ।
ततो विशेषं त्वयि नैव विप्रः । भावज्जनत्वय्यपरं निवेद्यम् ॥ १०७ ॥
विज्ञाय भावं नृपतिर्बभाषे । यथा प्रभुर्नः स्वतनुस्थ एव ।
एवं मतिः स्याद्भवतां तथाऽहम् । करोमि तापं त्यजतान्तरस्थम् ॥ १०८ ॥
आकर्ण्य वाचं नृपतेः प्रमोद । काष्ठां प्रपद्य स्थितिपालमेते ।
आनन्द्य गानेन चिरं नृपालात् । प्राप्याऽभ्यनुज्ञां निलयं प्रयाताः ॥ १०९ ॥



दग्धुं सर्वशवान्न्युञ्जत नृपामात्या नियोज्याग्रहः ।
यांस्तैरेत्य चितां प्रदीप्तदहनामारोपितां स्वां तनुम् ।
आविश्याथ स योगिनां परिवृढो वैश्वानरोच्छित्तये ।
प्रल्हादप्रणयापगाजलनिधिं तुष्टाव नारायणम् ॥ ११० ॥
अथ प्रशान्तो दहनस्तदानीम् । जना अवोचन्नृहरेः कृपायाम् ।
आरोपितेनाप्यमृतेन चक्रे । सत्यामृतस्यैव फलं बतेति ॥ १११ ॥
यतेरदाह्यत्वमिवाऽनुचिन्त्य । शान्तानलाया भगवांश्रितायाः ।
उत्थाय साकं स मुनिः स्वशिष्यैः । व्योमाध्वना मण्डनगेहमाप ॥ ११२ ॥
ये पद्मपादप्रमुखा निचेतुम् । गता निशम्य क्षितिपं प्रमीतम् ।
ज्ञात्वा गुरोरात्मतनुप्रवेशम् । माहिष्मतीं ते तत एव जग्मुः ॥ ११३ ॥
यद्धीर्जगज्जातमिवाऽसुरारेः । तनूरखेदाभृतशास्त्रजातम् ।
त्रिविक्रमाभिख्यतदात्मजन्मा । यः पार्वतीनन्दनतामयासीत् ॥ ११४ ॥
नीलकण्ठेन तेनास्मिन् शङ्कराभ्युदयाभिधे । कृते काव्ये चतुर्थश्च सर्गः संपूर्णतां गतः ॥११५॥
॥ इति श्रीशङ्कराभ्युदयाख्ये काव्ये चतुर्थः सर्गः सम्पूर्णः ॥

---

॥ अथ पञ्चमसर्गप्रारम्भः । श्रीशङ्कराय द्गुरवे नमः ॥

शङ्करं तदनु मण्डतोऽनमत्तद्वधूश्च निजगाद शङ्करः ।
तां त्वदीयमनुयोगमुत्तरं प्राप्याम्यवहिता भव क्षणम् ॥ १ ॥
इत्युदीर्य मुनिरुत्तरं ददौ नाक्षिपेद्भगवती यथा तथा ।
भारती तदनु मौनमाश्रयद्यत्तदेव खलु तत्पराजयः ॥ २ ॥
भारती मुनिवरं ततोऽवदच्छापमत्रितनयोऽतिकोपनः ।
मानुषत्वमददान्ममावधिस्तस्य मे त्वदुदितः पराजयः ॥ ३ ॥
सोऽभवन्निजपदं प्रयाम्यहं देहि मेऽनुमतिमित्यथो मुनिः ।
अम्ब या प्रतिकृतिर्मया तव स्थास्यतेऽस्तु तव तत्र संनिधिः ॥ ४ ॥
प्रापयेः सफलतामिमां मम प्रार्थनां निजपदं व्रजाधुना ।
इत्यवोचदुररीकृतामुकप्रार्थिता तदनु सा तिरोदधे ॥ ५ ॥
मण्डनो निजधनैः कृताध्वरोऽथाधिरोप्य विधिनाऽग्निमात्मनि ।
शङ्कराच्चरममाश्रमं ययौ दिक्चरीमपि सुरेश्वराभिधाम् ॥ ६ ॥
तं कृतार्थमकरोद्यतीश्वरः शुद्धभावमुपदेशतो निजात् ।
ब्रह्म तत्तदपरोक्षतां नयन्नैजभाष्यनिवहं च पाठयन् ॥ ७ ॥
शङ्करोऽथ ससुरेश्वरैः समं स्वस्य शिष्यनिवहैर्विनिर्ययौ ।
मण्डनस्य नगराधियासया मल्लिाकार्जुननिवासभूभृतः ॥ ८ ॥
अध्वनि स्वयमुपेत्य नम्रतामागतानुपनयन् कृतार्थताम् ।
गर्वितांस्तु वशयन्विवादतस्तं महेशनिलयं गिरिं ययौ ॥ ९ ॥
तत्र तीर्थसलिले कृताप्लवो मल्लिकार्जुनमुमां च पूजयन् ।
एत्य संमदभरं यतीश्वरः कंचनाध्युषितवाननेहसम् ॥ १० ॥

तत्र पाशुपतशाम्भविकान्दुर्मदान्विवदितुं समागतान् ।
स्वस्य शिष्यनिवहैः पराभवं प्रापयन्स्ववशतामलम्भयत् ॥ ११ ॥
तत्र कोऽपि कुमतिः कपालिको निःशलाक उपगम्य शङ्करम् ।
संप्रणम्य निजगाद भो मुने सर्वसद्गुणनिवासभूर्भवान् ॥ १२ ॥
अर्थना तव ततो वृथा भवेन्नेत्यवेत्य समुपागतोऽस्म्यहम् ।
याच भो इति तवाननाद्वचो निःसरेद्यदि तदाऽहमर्थये ॥ १३ ॥
याच भो इति जगाद शङ्करः प्राह तं स्म स कपालिकाधमः ।
शाम्भवं पुरमनेन वर्ष्मणा गन्तुमारचयमद्भुतं तपः ॥ १४ ॥
मामकेनतपसा प्रसादितः पार्वतीपतिरिदं जगाद माम् ।
भूभुजोऽखिलविदोऽथ वा शिरो देहि मेऽथ तव वाञ्छितं भवेत् ॥ १५ ॥
तत्समार्जनकृते प्रयास्यता नाऽधुनाऽपि तदुपार्जितं मया ।
दुर्लभा हि नृपसंनिधौ गतिः सर्वविद्दुरवबोधलक्षणः ॥ १६ ॥
त्वं तु भाग्यवशतोऽवधारितः सर्ववित्तदहमर्थये मुने ।
देहि मे निजशिरो निकृत्य भोस्तत्त्वविद्वर न ते छिदा व्यथा ॥ १७ ॥
उक्तवन्तमिति तं कपालिनं शङ्करोऽवददये निकृत्य मे ।
मस्तकं नय न मे शरीरके प्रीतिरस्त्यशुचिवस्तुपूरिते ॥ १८ ॥
तां निशम्य गिरमात्तसंमदो निर्जगाम कुमतिः कपालिकः ।
पद्मपाद उभयो रहःकथां दूरतोऽनुभवगोचरं व्यधात् ॥ १९ ॥
शङ्करश्च पिदधे कथामिमां तेन शङ्कितमनाः सनन्दनः ।
छन्नमूर्तिरवधाय सद्गुरोः सर्वकर्मसु दृशं निचिक्षिपे ॥ २० ॥
स्नातुकाम उपयातवान्मुनिः कंचनाऽथ विजनं जलाशयम् ।
स्नातमाह्निककृतं समाहितं शङ्करं स धृतखड्ग आगमत् ॥ २१ ॥
उद्गतासिमथ तं कपालिनं शङ्करस्य हतये सनन्दनः ।
क्रोशति स्म समुदीक्ष्य दूरतः पाहि भो नृहरे गुरुं मम ॥ २२ ॥
इत्यमुष्यवचनादनन्तरं प्राप्य दृग्विषयतां नृकेसरी ।
तं विदीर्य कुमतिं कपालिकं स्वांस्ततर्प नखरानसृक्झरैः ॥ २३ ॥
तारपद्मचरणारवश्रवाच्छाङ्करी सकलशिष्यसंहतिः ।
एत्य तत्र नृहरिं स्म वेक्षते संविदारितकपालिविग्रहम् ॥ २४ ॥
शङ्करोऽथ नृहरेर्महारवैरट्टहासकलितैः समाधितः
व्युत्थितः प्रणतवांस्तमीश्वरं शङ्करं नरहरिः स्म भाषत ॥ २५ ॥
शङ्कर त्वमवनाववातरो यत्कृते तदखिलं प्रसाधय ।
स्वान्तहेतुषु दुरात्मकर्मसु प्राप्नुहीषदपि नानुकूलताम् ॥ २६ ॥
इत्युदीर्य नृहरिस्तिरोदधे पद्मपादमथ शङ्करश्रवाः ॥
अन्वयुञ्जत कथं प्रसादितः पद्मपाद भवता नृकेसरी ॥ २७ ॥



प्रागहो बलगिरौ तपो व्यधां प्रार्थयन्नरहरेः प्रसन्नताम् ।
दीर्घकालमथ कोऽप्युपागतः काननेचर इदं जगाद माम् ॥ २८ ॥
विप्रघोरविपिने त्वमेककः किं वसस्यथ मयोत्तरं कृतम् ।
सिंहवक्त्रनृशरीरकं मृगं प्राप्तुकाम इति सोऽथ निर्ययौ ॥ २९ ॥
तादृशं मृगमसावथाऽहरद्वल्लिपाशकृतबन्धबाहुकम् ।
क्षिप्रमेव परिमुक्तबन्धनं तं विधाय भगवन्तमानमम् ॥ ३० ॥
संमदार्थकृतपूजनो हरिः मामुवाच वृणु मां वरानिति ।
प्रार्थितेप्सितवरस्तमब्रवं त्वं चतुर्मुखमुखैर्दुरासदः ॥ ३१ ॥
काननेचरवशं गतः कथं सोऽप्युवाच चतुराननादिकात् ।
भूरिजन्मकृतमत्स्मृतिर्ह्यसौ श्रेष्ठ इत्यथ तिरोदधे हरिः ॥ ३२ ॥
पद्मपादवचनामृतश्रवप्राप्तसंमदभरा जगद्गुरोः ।
शिष्यसंहतिरनुव्रजन्त्यमुं भूरिविस्मयगता गमत्पदम् ॥ ३३ ॥
शङ्करोऽथ निजभाष्यसंहतिख्यापनाकुमतिवादिनिग्रहौ ।
साधयन्नटत भूरितीर्थकः क्षेत्रमाप हरिशङ्कराभिधम् ॥ ३४ ॥
तत्र देवमुभयार्थकस्तवेनाऽस्तुवीत हरिशङ्करात्मकम् ।
निर्गतस्तदनु मूकपूर्विकामम्बिकामकृत शङ्करोऽर्चिताम् ॥ ३५ ॥
कश्चन क्षितिसुरोऽम्बिकागृहद्वारसीम्नि निदधन्मृतात्मजम् ।
भार्यया सह रुरोद वीक्ष्य तच्छङ्करो रुदितवान्दयानिधिः ॥ ३६ ॥
वागभूद्गगनतोऽशरीरिणी शक्तिहीनकरुणाऽतिदुःखदा ।
सोऽप्यवोचत यदि क्षमे दया शक्तिहीनपदमर्थवत्प्रभो ॥ ३७ ॥
शङ्करः करुणया यया प्रभोरात्मनोऽपि कृतवान् विगर्हणाम् ।
प्रीतिमेत्य परमेश्वरस्तया विप्रसूनुमुदजीवयत्क्षणात् ॥ ३८ ॥
बालजीवनकृताद्भुते जने शङ्करोऽथ रचिताम्बिकानतिः ।
अग्रहारमगमद्बहुद्विजं श्रीवलिं सकलशिष्यसंयुतः ॥ ३९ ॥
अग्रगं विरचयन्महाजडं स्वात्मजं तदनु तत्र कश्चन ।
एत्य शङ्करमुनीन्द्रमानमत्स्वात्मजं च नमयांचकार तम् ॥ ४० ॥
देशिकेन्द्रमवदच्च भो मुने पुत्र एष जडतापदं मम ।
नात्ति नो पिबति चाप्रणोदितो बालताडित उपैति नो रुदम् ॥ ४१ ॥
मूकवद्विरचितोपनीतिरप्यस्य मौक्यजुष एष मुञ्चति ।
यो न जाड्यमयमस्ति कोऽपि चेदभ्युपायमिममीरय प्रभो ॥ ४२ ॥
बालकं तदनु शङ्करोऽब्रवीत्कस्त्वमित्यथ स उत्तरात्मकम् ।
नाहमादिरचितं तदात्मना श्लोकवृन्दमपठन्महामतिः ॥ ४३ ॥
तत्त्वविद्विषयलम्पटं सुतस्त्वां न नन्दयति देहि नो द्विज ।
इत्युदीरयति शङ्करे द्विजस्तं समर्प्य गुरवे गृहं ययौ ॥ ४४ ॥

हस्त आमलक इत्युभे पदे यत्समासघटके तदाख्यया ।
बालकं यतिवरः समाह्वयद्धस्तधात्र्युपमतत्त्वदर्शिनम् ॥ ४५ ॥
प्राक्तनैरथ निजाखिलाश्रवैः संयुतोऽयममुना नवेन च ।
प्राप्य शृङ्गगिरिनामकं पुरं साधुशीलबुधसंघसंकुलम् ॥ ४६ ॥
वर्ध्यमानरुचितुङ्गभद्रया यद्यदन्तिकगतोऽतिपावनः ।
ऋष्यशृङ्गमुनिपुङ्गवाश्रमः शान्तवैरहरिकुञ्जरादिकः ॥ ४७ ॥
तत्र शिल्पिवरनिर्मिते शुभे मन्दिरे प्रतिकृतिं विधिस्त्रियाः ।
स्थापयन्नकृत पूजितां मुनिस्तत्र संनिधिमसावविन्दत ॥ ४८ ॥
शान्तिदान्तिमुखसद्गुणालयांस्तत्पुरं वसुमतीसुरव्रजान् ।
नैजभाष्यनिवहं प्रपाठयन्नध्युवास यतिपुङ्गवश्चिरम् ॥ ४९ ॥
शिष्य आस यतिपुङ्गवस्य कोऽप्युज्झितस्वतनुखेदभावनम् ।
साधितस्वगुरुसेवनो गिरिः संस्कृतोक्तिसमयग्रहोज्झितः ॥ ५० ॥
एकदा यतिपतिर्निजाम्बरक्षालनाय तटिनीं गते गिरौ ।
अस्य शिष्यनिवहस्य पाठने व्यातनोदतितरां विलम्बिताम् ॥ ५१ ॥
शान्तिपाठमथ कर्तुमुद्यतेऽप्यस्य शिष्यनिवहेषु शङ्करः ।
अब्रवीद्गिरिरुपैष्यति त्वरा माऽस्तु पद्मचरणोऽभ्यधादथ ॥ ५२ ॥
कुड्यकं प्रतिनिधिर्गिरेरिदं विद्यते हि गुरुवर्य पाठ्यताम् ।
तन्मदच्छिद उपादिशद्गुरुश्चेतसैव गिरये श्रुतव्रजम् ॥ ५३ ॥
आगतो गिरिरथाऽत्मना कृतं ब्रह्मबोधकरतोटकव्रजम् ।
संपठन्गुरुवरस्य संनिधौ विस्मितास्तमवलोक्य शिष्यकाः ॥ ५४ ॥
तोटकाख्यबहुवृत्तकारिणं तं मुनिं तदनु शङ्करो मुनिः ।
आजुहाव किल तोटकाख्यया या दिगन्तचरणेन चालसा ॥ ५५ ॥
एकदा यतिपतिं सुरेश्वरः प्राप्य देशिकवर त्वदाज्ञया ।
किञ्चिदारचयितुं लषाम्यहं शिष्यतां तदिति वाचमाददे ॥ ५६ ॥
भाष्यामारचि मया महामुनिव्याससूत्रगतमस्य वार्तिकम् ।
त्वं विधेहि गुरुरेवमुक्तवानभ्युपेत्य निरगात्सुरेश्वरः ॥ ५७ ॥
चित्सुखप्रभृतयस्ततो गुरोः संनिधिं निशमितप्रवृत्तयः ।
एत्य पद्मचरणप्रिया जगद्देशिकं निजगदुस्तदाश्रवाः ॥ ५८ ॥
सूत्रभाष्यगतवार्तिकक्रियां शिष्ट आर्यचरणैः सुरेश्वरः ।
इत्युदन्तमवकर्ण्य सव्यथा आगताः किमपि वेदयामहे ॥ ५९ ॥
कर्मतत्परमतिः स निर्गतो नीयते स्म चरमाश्रमं बलात् ।
वार्तिकं यदि करोत्यसौ वदेद्भाष्यभावमपि तत्र कर्मणि ॥ ६० ॥
तत्समास्मकृततत्सनन्दनस्तत्करोतु परतत्त्वबोधवान् ।
चित्सुखादिवचनात्परं मुनिर्देशिकेन्द्रमवदत्सनन्दनः ॥ ६१ ॥



तत्करामलक आतनोत्वसौ ब्रह्मवित्सकलशास्त्रतत्त्ववित् ।
तां सनन्दनगिरं निशम्य स व्याजहार यतिमण्डलाग्रणीः ॥ ६२ ॥
त्वत्समीरितगुणाश्रयो ध्रुवं हस्तधात्र्यभिध एष मस्करी ।
आजनुर्दृढसमाधितत्परो वार्तिकं कथमसौ विधास्यति ॥ ६३ ॥
पृष्टवान्यतिवरं तदाश्रवः कश्चन श्रवणमेव नार्जितम् ।
हस्तधात्र्यभिदभिक्षुणा कथं ब्रह्मदर्शनमसावगादिति ॥ ६४ ॥
शङ्करोऽमुमवदत्पुराऽवसद्यामुने तट उदारधीर्मुनिः ।
एत्य काऽपि वनिता प्लवेच्छया न्यस्य बालमगमत्तदन्तिके ॥ ६५ ॥
बालकोऽनवहिते मुनीश्वरे चङ्क्रमन्निपतितो नदीतटात् ।
प्राप्तमृत्युरुपकण्ठमाययौ मातुरम्बुझररंहसा हृतः ॥ ६६ ॥
आहृतेद्दशसुताऽन्तिकं मुनेः प्राप सा प्ररुदती ततो मुनिः ।
स्वप्रमादकृतशोकनुत्तये तत्सुतस्य तनुमाविशत्स्वयम् ॥ ६७ ॥
सोऽयमेव खलु हस्तधात्र्यसांवार्जयच्छ्रवणमाद्यवर्ष्मणि ।
शाधि वार्तिककृतौ जगद्गुरो पद्मपादमिति तेऽब्रुवन्पुनः ॥ ६८ ॥
वार्तिकप्रणयनं सुरेश्वरं शिष्टवानहमतो न हीतरम् ।
शास्मि पद्मचरणो भवत्सखाः कांचिदारचयतां परां कृतिम् ॥ ६९ ॥
वार्तिकप्रणयनात्सुरेश्वरो वार्यते भवदसंमतेर्मया ।
इत्युवाच यतिवर्य आश्रवान् वारितोऽपि च सुरेश्वरस्ततः ॥ ७० ॥
शङ्करोऽवददथो सुरेश्वरं त्वामवेत्य बुधकर्मतत्परम् ।
वार्तिकप्रणयनेऽन्तरायतां तावके कतिचिदाश्रवा ययु ॥ ७१ ॥
त्वय्यकर्मपरता मतिर्यया स्याद्विनेयनिवहस्य तां कृतिम् ।
निर्मिमीष्व स चकार तामिमेऽज्ञासताऽथ तमकर्मतत्परम् ॥ ७२ ॥
सूत्रभाष्यगतवार्तिकक्रियामन्तरायविहतां चकार यः ।
तत्कृतिर्भुवि न संचरेदिति प्राप्तमन्युरशपत्सुरेश्वरः ॥ ७३ ॥
कण्वतित्तिरिमुनीन्द्रशाखयोरन्तयोरकृषि भाष्ययोर्युगम् ।
वार्तिके कुरु तयोर्द्वयोः पुरेवाऽन्तरायमिह मास्म शङ्कथाः ॥ ७४ ॥
सूत्रभाष्यविवृतिं करिष्यसे भामतीति जगति प्रथां गतम् ।
भावि जन्मनि बुधेति भिक्षुराडभ्यवोचत सुरेश्वरं ततः ॥ ७५ ॥
वार्तिकद्वयमथात्मना कृतं प्रार्पयद्गुरुवरे सुरेश्वरः ।
सूत्रभाष्यविवृतिं स्वनिर्मितां पद्मपादमुनिरप्यनुत्तमाम् ॥ ७६ ॥
पादपञ्चकमशिश्रवद्गुरोरात्मनिर्मितकृतेः सनन्दनः ।
उक्तवानथ गुरुः सुरेश्वरं पादपञ्चकमिदं चरेद्भुवि ॥ ७७ ॥
शङ्करेण कृतशासनाः परेऽप्याश्रवा विदधिरे महाकृतीः ।
अद्वितीयपरतत्त्वबोधिकाः सत्प्रसादगुणभासुरा बहुः ॥ ७८ ॥

शङ्कराख्यगिरिराजसंभवा शिष्यशैलकृतिसिन्धुसङ्गता ।
पापशान्तिकरसंश्रवाप्लवा भाष्यजह्नुतनया विदिद्युते ॥ ७९ ॥
तीर्थसेवनसमुत्सुकस्ततः पद्मपादमुनिरात्मनो गुरोः ।
पादयोर्निपतितोऽनुमान्य तं निर्जगाम सहशिष्यसंहतिः ॥ ८० ॥
शङ्करस्य जननी महामयैः संनिधापितमृतिः सुतं ततः ।
अस्मरत्स निजमातुरन्तिकं व्योममार्गत उपागतोऽनमत् ॥ ८१ ॥
पुत्रवीक्षणगतामयव्यथा सा सुतं निगदति स्म पुत्रक ।
प्राणवायुरयमत्र मत्तनौ स्वल्पमेव समयं निवत्स्यति ॥ ८२ ॥
त्वं ममामरणमत्र सुस्थितो मां मृतां विरचयन् सुसंस्कृताम् ।
अन्यतो व्रज तथेति शासनं मातुरभ्युपजगाम शङ्करः ॥ ८३ ॥
अभ्यधात्स्वजननीमथो मुनिर्ब्रह्म निर्गुणमनुस्मरेति सा ।
दुःस्मरं चिरपरिश्रमैरिदं स्मर्तुमप्यनलमित्यवोचत ॥ ८४ ॥
प्रापयन् शिवपदं स्वमातरं तुष्टुवेऽथ गिरिशं मुनीश्वरः ।
आगतास्तदनु शैवकिङ्कराः सर्वभूषणयुजोऽथ साऽबिभत् ॥ ८५ ॥
प्रार्थनाभिरथ तान्निवर्तयन्दानवारिमतिसुन्दराकृतिम् ।
दीप्तपीतवसनं चतुर्भुजं ध्याय मातरिति शङ्करोऽब्रवीत् ॥ ८६ ॥
पुत्रदर्शितपथेन संस्मरन्त्यम्बुजेक्षणमथाऽम्बिका मुनेः ।
अप्रयासमजहान्निजानसून् व्योमयानमगमत्तदन्तिकम् ॥ ८७ ॥
किङ्करा मुररिपोर्विमानतोऽथावरुह्य धृतदिव्यविग्रहाम् ।
मातरं यतिपतेर्बभाषिरे यानमेतदधिरुह्यतामिति ॥ ८८ ॥
साऽधिरुह्य तदिदं मुनिप्रसूरर्चिराद्यवयवेन वर्त्मना ।
वैष्णवं पदमवाप्य निस्तुलं शोकवर्जितमवाप संमदम् ॥ ८९ ॥
संस्क्रियां तदनु मातुरात्मनः कर्तुमुद्यतमना अभून्मुनिः ।
ज्ञातयो जगदुरेत्य संस्क्रिया-योग्यता तव यतेः कथं न्विति ॥ ९० ॥
तर्हि भोः सविधि यूयमेव तां संस्कुरुध्वमिति शङ्करोऽभणत् ।
नान्वमंसत तदप्यमी खला मत्सरेण परिदूषिताशया ॥ ९१ ॥
शङ्करोऽथ निजयत्नसंचितैरार्द्रताविरहितैर्महेन्धनैः ।
मातृबाहुपरिमन्थजाग्निना तां ददाह सदनस्य संनिधौ ॥ ९२ ॥
संस्कृतौ विरचितां निजार्थनां ये वृथा विदधिरे स्वबान्धवाः ।
तान् शशाप यतिपुङ्गवो रुषा मा स्म कर्म कुरुत द्विजन्मनाम् ॥ ९३ ॥
मा स्म भुञ्क्षत यतीश्वराः भवन्मन्दिरे पितृवणं च वो भवेत् ।
एतदादि सदनस्य संनिधौ शापवीर्यमधुनाऽपि वर्तते ॥ ९४ ॥
शङ्करस्तदनु वासमातनोत्केरलस्थितपवित्रभूमिषु ।
पुण्यसज्जननिषेवितो निजं भाष्यवृन्दमपि तान्प्रपाठयन् ॥ ९५ ॥



तावदब्जचरणो जलाधिपश्रीदवासवहरित्समाश्रयाम् ।
घोरपातकजनान्तकारिणीं क्षेत्रतीर्थविततिं न्यषेवत ॥ ९६ ॥
याम्यदिग्गतमथो सनन्दनः क्षेत्रतीर्थनिवहं सिषेविषुः ।
मातुलस्य पुरमाययौ पथा सोऽभिगम्य गृहमानिनाय तम् ॥ ९७ ॥
वृत्तमाप्रवसनं यदात्मनस्तत्समस्तमवदत्स मातुले ।
पृष्टवत्यथ तदीयमन्दिरे प्रार्थनेन बुभुजे सशिष्यकः ॥ ९८ ॥
भुक्तवन्तममुमस्य मातुलोऽदर्शयत्स्वकृतिमात्मनो मम ।
या स्ववृत्तकथनप्रसङ्गतः ख्याप्यमानरचनेत्यवोचत ॥ ९९ ॥
सोऽपि तां कृतिमदर्शयत्ततो मातुलो गुरुमतस्य खण्डनात् ।
तप्यमानहृदयोऽपि तां कृतिं श्लाघते स्म परिकम्प्रमस्तकः ॥ १०० ॥
मातुले निजकृतिं निधाय तां रामसेतुमभिनिर्ययौ मुनिः ।
मातुलः स्वभगिनीसुते गते व्यातनोदतिदुरर्थचिन्तनम् ॥ १०१ ॥
मद्गुरोर्मतमखण्डयत्सुतो मत्स्वसुर्निजकृतौ स तत्कृतीः ।
खण्डनेऽस्मि पटुरन्तमापये तां कृतिं तदनलार्पणादिति ॥ १०२ ॥
तां ददाह विबुधाभिनन्दितां सद्मना सह निजेन मन्दधीः ।
इत्युदोददपि किं समर्पये याचति स्वसृसुते निजां कृतिम् ॥ १०३ ॥
रामसेतुमभिगम्य वारिधेर्वारि तत्र रचितावगाहनः ।
रामनाथमभिपूज्य निर्वृतो मातुलस्य पुरमाययौ पुनः ॥ १०४ ॥
मातुलस्तदनु वीक्ष्य तस्य तं मुक्तकण्ठमरुदत्किलामुना ।
स्वीयपुस्तकविनाशदुःखजे रोदने प्रतिनिधी कृतो यथा ॥ १०५ ॥
पुष्टरोदननिदानमब्रवीन्मातुल स्म मदहत्कृतिं तव ।
हव्यवाह इति तं सनन्दनस्तच्छुचं प्रशमयन्नवोचत् ॥ १०६ ॥
नाशमेतु कृतिरस्ति मे मतिस्तां कृतिं विरचयाम्यहं तथा ।
इत्युदीर्य निजमातुलालये तां कृतिं पुनरुपाक्रमिष्ट सः ॥ १०७ ॥
मातुलोऽस्य नुतिमोषकृद्विषं प्राददादथ मुनिः सहान्धसा ।
ग्रन्थनिर्मितिपटीयसी मतिस्तं जहावथ स विव्यथेतराम् ॥ १०८ ॥
तीर्थसेवनकृते विनिर्गतैः स्वैः स्वतीर्थ्यनिवहैरथात्मवत् ।
एत्य सङ्गतिमिमान् सनन्दनः संक्षयं निजकृतेरवेदयत् ॥ १०९ ॥
दूयमानमनसः सनन्दनग्रन्थसंक्षयकथाश्रवादमी ।
शुश्रुवुः स च सनन्दनस्ततः केरलेषु वसतिं जगद्गुरोः ॥ ११० ॥
छात्रसंहतिरसौ जगद्गुरोस्तं प्रति प्रचलिता विदिद्युते ।
लुम्पतीर्दुरितमात्मसेवितां जाह्नवीव सरितामधीश्वरम् ॥ १११ ॥
आगतां निजविनेयसंहतिं शङ्करो रचितवन्दनां मुदा ।
स्वागतं समनुयुज्य दृष्टवानप्रसन्नवदनं सनन्दनम् ॥ ११२ ॥

अप्रसन्नमुखता न ते कदाप्यैक्षि साऽद्य भवतः कुतोऽभवत् ।
पृच्छतीति यतिराजि दग्धतां व्याहरन्निजकृतेः सनन्दनः ॥ ११३ ॥
वत्स मा स्म विषदो मया श्रुतं त्वत्कृतेर्विलिख पादपञ्चकम् ।
मन्मुखप्रसृतमेतदेव ते चारयेद्वसुमतीतले यशः ॥ ११४ ॥
इत्युदीर्य भगवान्पपाठ तत्संविलिख्य स च मोदमासदत् ।
नूनमाश्रितवतो महात्मनो नैव दूरमनुवर्तते विपत् ॥ ११५ ॥
तां कथां निशमयन् सविस्मयः केरलाधिप उपेत्य शङ्करम् ।
संननाम स च तं निरामयं पृष्टवानथ फलं तदागतेः ॥ ११६ ॥
नाटकत्रयमभून्मया कृतं दग्धमित्यभिदधन्महीपतिः ।
भावमस्फुटयमेष तत्पठन् लेखितं व्यरचयन्महीभुजा ॥ ११७ ॥
दग्धनैजकृतिलाभनिर्वृतो भूपतिर्यतिपतिं व्यजिज्ञपत् ।
कार्यमस्ति यदि मां तदादिशेत्यार्यपाद इदमादिशन्नृपम् ॥ ११८ ॥
मज्ज्ञातयः कालटिनाम्नि सन्ति । नृपाऽग्रहारे त इमेऽक्रियन्त ।
द्विजातिकर्मानधिकारिणो मत्–। शापेन तैर्मा व्यवहारयाऽन्यान् ॥ ११९ ॥
इत्याज्ञाप्य व्यसृजदवनीनायकं लोकबन्धुः ।
तावच्छृङ्गाचलपुरगताः केचिदाचार्यशिष्याः ।
आचार्यस्याऽगतिमतिचिरं संप्रतीक्ष्यानुपेते ।
तस्मिंस्तस्यान्तिकमुपययुस्तद्वियोगासहत्वात् ॥ १२० ॥
यद्धीर्जगज्जातमिवासुरारे–। स्तनूरखेदाभृतशास्त्रजातम् ।
त्रिविक्रमाभिख्यतदात्मजन्मा । यः पार्वतीनन्दनतामयासीत् ॥ १२१ ॥
नीलकण्ठेन तेनाऽस्मिञ्शङ्कराभ्युदयाभिधे ।
कृते काव्ये पञ्चमश्च सर्गः संपूर्णतां गतः ॥ १२२ ॥
॥इति श्रीशङ्कराभ्युदयाख्ये काव्ये पञ्चमः सर्गः संपूर्णः॥

———o———

अथ षष्ठसर्गप्रारम्भः । श्रीशिवाय गुरवे नमः ।

हरितां विजयाय निर्गतोऽभूः सह शिष्यैः ससुधन्वभूमिपालः ।
स मनागवशेषतामवेत्य त्वरमाणो भगवान्निजायुषोऽथ ॥ १ ॥
प्रथ प्रययौ यतीन्द्रभास्वानविनाभूतसहस्रशिष्यभानुः ।
रविसूनुदिशं गवां प्रवषः शमयन्दुर्मददावपावकौघम् ॥ २ ॥
दशकन्धरवैरिसेतुभाग्भिः सह शाकैरभवन्मुनेर्विवादः ।
पटुयुक्त्यचिरप्रयोगरम्यः स्तवनीयो गुरुणाऽपि निर्जराणाम् ॥ ३ ॥
अथ तान्मदिरामिषप्रवृत्तान्विजितान्विप्रकुलाद्बहिर्विधाय ।
अभिपूज्य च रामनाथदेवं स विजिग्ये द्रविडान् सचोलपाण्ड्यान् ॥ ४ ॥
यतिनां प्रवरोऽधिगत्य काञ्चीपुरमस्मिञ्शुभमालयं मृडान्याः ।
विरचय्य निरस्य तान्त्रिकार्चामनुवृत्तां व्यतनिष्ट वैदिकार्चाम् ॥ ५ ॥



अथ वेङ्कटभूधराधिनाथं समुपेत्यार्चितमानतं च कृत्वा ।
विनयेन पदानतानिहान्ध्रान् स निजानुग्रहगोचरान्वितेन ॥ ६ ॥
गतवान्स विदर्भराजधानीं तदधीशेन कृतार्चनोऽथ तत्र ।
निजशिष्यगणेन भैरवीयान्दमयामास विवादसंप्रवृत्तान् ॥ ७ ॥
जगदे यतिराड्विदर्भराजा प्रतिकर्णाटवसुंधरं यियासुः ।
भगवन्विनिवेदयामि तुभ्यं स हि कर्णाटभुवं भवान्प्रयातु ॥ ८ ॥
ननु सा बहुभिः कपालिपाशैरभिपूर्णश्रुतिविप्ररूढवैरैः ।
श्रुतिदूषकनिग्रहप्रवृत्ते त्वयि ते हिंसनचिन्तनं विदध्युः ॥ ९ ॥
इति वादिनि भूमिपे न्यगादीदनुयातो बलवान्सुधन्वभूपः ।
मयि तिष्ठति किं विदध्युरेते भगवंस्तं विषयं प्रयाह्यशङ्कम् ॥ १० ॥
वदतीति सुधन्वभूमिपाले प्रययौ तं विषयं यतिप्रबर्हः ।
निसितोद्यतमण्डलाग्रहस्तैः परिवीतो नरपालकिङ्करौघैः ॥ ११ ॥
मुनिमेत्य जगाद तत्र कश्चित्क्रकचो नाम कपालिनां वरेण्यः ।
उचितं भसितं दधासि यत्तन्ननु तद्यन्न करोषि भैरवार्चाम् ॥ १२ ॥
नृशिरःकुसुमैस्तदैव कृत्तैः सुरया चार्चति यो न भैरवं सः ।
कथमेतु मुदं शिवासदृश्या सह कैलासमुपेत्य तीर्णशोकः ॥ १३ ॥
क्रकचं निगदन्तमेवमुग्रां रुषमासाद्य सुधन्वभूमिपालः ।
निरवासयदग्रजातिसंघातप्रजिघायाथ चमूं कपालिनां सः ॥ १४ ॥
तदनीकमवेक्ष्य बाडबानां निवहे स्फीतभयाकुले सुधन्वा ।
परिसान्त्व्य तमात्मनश्चमूभिः सह तेषां विजयाय निर्जगाम ॥ १५ ॥
गतवत्यवनीपतौ ससैन्ये क्रकचेन प्रहितं कपालिसैन्यम् ।
इतरद्विजवृन्दमावृणोच्छरणं शङ्करदेशिकं जगाम ॥ १६ ॥
निजहुंकृतिसंभवाग्निनाऽसौ दहति स्माऽथ कपालिनामनीकम् ।
समरे विनिहत्य शत्रुसैन्यं नरपालोऽपि गुरूपकण्ठमाप ॥ १७ ॥
क्रकचो निजशासनेन योद्धुं समुपापातहतं स्वशिष्यसङ्घम् ।
अवलोक्य समेऽथ मानमन्युर्यतिवर्यान्तिकमेत्य तं बभाषे ॥ १८ ॥
कुमते निहता मदीयशिष्या अगमन्यं सहशिष्यभूमिपं त्वाम् ।
गमयामि तमेव लोकमाशु क्षपयन् शिष्यविनाशजन्यशोकम् ॥ १९ ॥
स निमीलितलोचनोऽथ दध्यौ नृकरोटिः करगाऽस्य पूरिताऽभूत् ।
सुरयार्थमसौ निपीय तस्याः परिदध्यौ हृदि भैरवं कपाली ॥ २० ॥
अतिबभ्रुजटो नृशीर्षमाली धृतशूलो गिरिराजतुङ्गदेहः ।
अरुणेक्षण उज्झिताट्टहासो नयनाध्वानमियाय भैरवोऽथ ॥ २१ ॥
अथ भैरवमर्थयांबभूव क्षपयैकं यतिमित्ययं कुबुद्धिः ।
किमरे मयि ते विरोध एवं परिजल्पन् स कपालिनं जघान ॥ २२ ॥

अथ भैरवमर्थयांबभूव स्वनुतं मांसदृशां न गोचरः स्याः ।
भगवन्निति शङ्करः स देवः क्षणमात्रेण तिरोहितो बभूव ॥ २३ ॥
विषये स्वमतं प्रसार्य तस्मिन्नय गोरमवाप संयमीन्द्रः ।
श्रितपूज्यविजेयनीलकण्ठं सह शिष्यैश्च सुधन्वना च राज्ञा ॥ २४ ॥
अथ सिन्धुजले कृतावगाहः स समभ्यर्च्य महाबलाख्यमीशम् ।
बहिरालयमण्डपे न्यवात्सीद्धरदत्ताख्य उपागतोऽत्र कश्चित् ॥ २५ ॥
यतिरेष क एष भूपतिर्वा गतवन्ताविह किं फलाय वेति ।
अनुयुज्य स उत्तराणि लब्ध्वा स्वगुरुं प्राप्य जगाद नीलकण्ठम् ॥ २६ ॥
भगवन्यतिभूभृताविहैतां समसंख्याकविनेयसैन्ययुक्तौ ।
यतिरिच्छति ते जयं दिशाजिन्नरपालोऽस्य सहायतां चिकीर्षुः ॥ २७ ॥
अथ शिष्यमुवाच नीलकण्ठः परशक्ति न विदन्ति सावलेपाः ।
जयमिच्छति मे यदेष भिक्षुर्न हि जेतुं प्रभुरीश्वरोऽपि यं माम् ॥ २८ ॥
धरणीमधुनैव कीर्तिहंस्या यतिनस्तस्य विवादगर्जितेन ।
सुमते प्रविहापयामि येन त्वमवेया वितथीतरां गिरं मे ॥ २९ ॥
इति तु विनिगद्य नीलकण्ठो यतिवर्यस्य समीपमाजगाम ।
शिवतत्परसूत्रभाष्यकर्ता गणनातीतनिजाश्रवानुयातः ॥ ३० ॥
अथ तेन विवादमीहमाने यतिसम्राजसुरेश्वरस्तमूचे ।
भगवन्मयि किङ्करे स्थिते किं त्वमिहायास्यसि मां नियुङ्क्ष्व वादे ॥ ३१ ॥
तव पण्डितताम‌वैमि तिष्ठ त्वमयं ते गुरुरातनोतु वादम् ।
इति वादिनि नीलकण्ठ आर्यः स्वयमुद्युक्तमना अभूद्विवादे ॥ ३२ ॥
अथ दारितनीलकण्ठपक्षं यतिनो युक्तिनिशातखड्गपातम् ।
अवलोक्य भियैव कीर्तिहंसो लयनं शैववरस्य वाञ्छति स्म ॥ ३३ ॥
अथ शैववरः स्वपक्षरक्षापटिमानं विजहावथाऽस्य पक्षम् ।
अभिदूषयितुं प्रवृत्त आसीदथ तत्राऽपि च कुण्ठशक्तिकोऽभूत् ॥ ३४ ॥
अथ शङ्करशिष्यभावमागात्सहशिष्यप्रकरेण नीलकण्ठः ।
सह तैर्विषयेष्वटन्यतीन्द्रः स्वनिबन्धाननयत्प्रचारमेषु ॥ ३५ ॥
यतिवर्यमुपेत्य पाञ्चरात्रा बहवो द्वारवतीमवाप सन्तम् ।
उपचक्रमिरे विवादमेते विजिताः पद्मपदादिशिष्यवर्यैः ॥ ३६ ॥
तदनूज्जयिनीमवाप्य नत्वा स महाकालनिकेतनं महेशम् ।
प्रजिघाय जिगीषुरब्जपादं मतिमन्तं प्रति भट्टभास्कराख्यम् ॥ ३७ ॥
अयि पण्डित वादवाञ्छयाऽस्मद्गुरवो विश्रुतशङ्कराभिधानाः ।
भवदानयनाय मां प्रजिघ्युर्द्रुतमेहीत्यमुमब्जपाद ऊचे ॥ ३८ ॥
श्रुतमद्यशसाऽपि मद्विवादे गुरुणा ते विधृता कथं नु वाञ्छा ।
प्रहसन्निति शङ्करं स आगाल्लघयन् गर्वभरेण काञ्चनाद्रिम् ॥ ३९ ॥



सह शङ्करयोगिना विवादो विबुधेनाऽरचि भट्टभास्करेण ।
न पुरेदृशवादिलाभ आसीन्मम हीति प्रमदं ययौ मुनीन्द्रः ॥ ४० ॥
दिवसैरथ कैश्चिदात्मपक्षं यतिराट्-खण्डितमक्षमोऽभिगोप्तुम् ।
उपशान्तचिरोढगर्वभारो मुनिवर्यं शरणं जगाम श्रीमान् ॥ ४१ ॥
अथ तं विदधे स शुद्धबुद्धिं निजभाष्याध्ययनात्ततत्त्वबोधम् ।
अथ बाणमयूरदण्डिमुख्या अपि याताः पथि भट्टभास्करस्य ॥ ४२ ॥
अथ बाह्लिकवासिवेदबाह्यान् स विनिर्जित्य तदीयपुस्तकौघम् ।
सकलं तटिनीह्रदे निमज्य स्ववशेथा्हृरदादिदेशभाजः ॥ ४३ ॥
प्रतिवादिजयात्तगर्वभारं दृढयुक्त्याऽखिलशास्त्रखण्डनेन ।
गतखण्डनकारनामधेयं विबुधं वादजितं व्यधान्मुनीन्द्रः ॥ ४४ ॥
अथ योऽभिनवादिगुप्तवाच्यो विदधे शाक्यमुनीन्द्रसूत्रभाष्यम् ।
तमुपाश्रितकामरूपदेशं यतिवर्यो गमयांचकार भङ्गम् ॥ ४५ ॥
स जितो मनसेदमालुलूचे जितता मानवतां मृतेर्गरिष्ठा ।
यतिना यदनेष्यनेन तां तन्मरणं संप्रददानि कृत्ययाऽस्य ॥ ४६ ॥
इति भिक्षुपतावसन्मनीषां स दधानोऽपि जनापवादशङ्की ।
समयं विललम्ब एष कंचिद्यतिराजं विनयेन सेवमानः ॥ ४७ ॥
अथ शङ्कर एत्य गौडदेशं स मुरारिं सह धर्मगुप्तधीरम् ।
अकृतोदयनं जितं विवादे शरणाप्त्या कृतकृत्यतां गतं च ॥ ४८ ॥
इति सर्वकुवादिनो निगृह्णन्नवनौ चारितसर्वनैजभाष्यः ।
अनुवृत्तपराशरात्मजाज्ञः कृतकृत्यं स्वमवेद्यतिप्रबर्हः ॥ ४९ ॥
यतिवर्यजिघांसयाऽथ कृत्यां प्रहिणोति स्म स शक्तिभाष्यकारः ।
अमुया जनितो भगन्दराख्यो भगवन्तं समुपाससाद रोगः ॥ ५० ॥
स हि तोटकनामकोऽस्य शिष्यः रुजया स्त्रावितरक्तदूष्यमाणम् ।
निरणिक्त मुहुर्मुहुः पटौघं प्रणयान्मुक्तजुगुप्स निर्मलात्मा ॥ ५१ ॥
अनहंकरणं कलेवरादौ रुजमेतां महतीमुपेक्षमाणम् ।
परितापभरं प्रपद्यमाना यतिराजं न्यगदन्सनन्दनाद्याः ॥ ५२ ॥
न तवाभिमतिः प्रभो शरीरे तदपीदं परिपाल्यमेव गात्रम् ।
विरहानह चेतनां तव त्वद्विषयप्रेमजुषां सुखाप्तये नः ॥ ५३ ॥
उपसर्पणसंप्रसादितो नस्तदुपेत्याऽत्र भिषग्गणो भिषज्यन् ।
भवता न निवार्य इत्यथाऽयं निजशिष्यार्थितमर्थमन्वमंस्त ॥ ५४ ॥
अथ वैद्यवराः सरोजपादप्रमुखप्रार्थनयैत्य वीक्ष्य रोगम् ।
निरचिन्वत दुर्जयं तथैव न्यगदन्नार्यपदाब्जया निरायन् ॥ ५५ ॥
मदनान्तकशासनेन दस्त्रावुपगम्येममवोचतां यतीन्द्रम् ।
रुगियं परकृत्ययाऽर्पिता ते न चिकित्स्याऽपि स इत्यधो अयाताम् ॥ ५६ ॥

द्युभिषग्वचनं सनन्दनार्यो निशमय्य प्रशमाय तद्रुजायाः ।
अजपन्नृमृगेन्द्रमन्त्रराजं शतधारं विपदद्रिदारणायाम् ॥ ५७ ॥
अरुणद्युतिशेखरो जपन्तं परकृत्या हि नृसिंह पीडचमाना ।
स्वनियोक्तुरिमां रुजं हि दत्ते यदसौ नेच्छति विद्विषोऽपि दुःखम् ॥ ५८ ॥
गुरुवाचमनादृतां स कृत्वा परमन्त्रं जपति स्म पद्मपादः ।
गुरुवर्यमपास्य सा हि कृत्या स्वनियोक्तॄ रुजया तयाऽन्तमाधात् ॥ ५९ ॥
अरुजं यतिराट्-शरीरमासीदपजन्यं प्रमदं तदाऽस्य शिष्याः ।
कमलासनसंमदोपरिष्टात्पठनीयः श्रुतिमस्तके स एव ॥ ६० ॥
अथ शङ्कर एकदा दिनान्ते समुपायान्तमपुण्यदुर्निरीक्ष्यम् ।
गुरुमैक्षत गौडपादसंज्ञं स्वगुरोः सैकतमाश्रितो द्युनद्याः ॥ ६१ ॥
अभिगम्य गुरुं तदङ्घ्रियुग्मे निदधन्मस्तकमानतो मुनीन्द्रः ।
स्थितवान्पुरतोऽथ पूज्यपादस्तमपृच्छत्किल शङ्करं विनीतम् ॥ ६२ ॥
अयि वत्स किमार्जयः शमादीन्गुरुरासाद्य निषेवया प्रसादम् ।
परतत्त्वमदर्शयत्किमेते गुणिनस्त्वां समुपासते विनेयाः ॥ ६३ ॥
गुरुवर्यकृपा खलार्थदात्री कृपणं मां विषयीचकार दैवात् ।
इति शङ्कर उत्तरं ददौ तं पुनरेवं निजगाद गौडपादः ॥ ६४ ॥
अयि वत्स गुरुस्तवाऽवदन्मां मम शिष्यो निगमान्तभाष्यकर्ता ।
भगवन् विवृतिं चकार रम्यां तव माण्डूक्यगपद्यसंचयस्य ॥ ६५ ॥
इति तद्वचनं निशम्य तां ते विवृतिं द्रष्टुमना उपागतोऽस्मि ।
गुरुवर्यवचो निशम्य शीघ्रं प्रजिघायाऽनयनाय शिष्यमस्याः ॥ ६६ ॥
अथ शिष्यसमाहृतां कृतिं तामवलोक्य प्रतिनन्द्य गौडपादः ।
अभणन्निजभावभेदिनीं ते विवृतिं वीक्ष्य परां मुदं गतोऽस्मि ॥ ६७ ॥
वृणुया वरमित्यमुं स नित्यं परतत्त्वे स्वमनःस्थितिं प्रवव्रे ।
अचिराद्भवितेयमित्युदीर्य क्षणतोऽन्तर्धिमवाप गौडपादः ॥ ६८ ॥
गुणकीर्तनजातसान्द्रमोदः स्वगुरोः सैकतसीम्नि देवनद्याः ।
अनयत्समयं कियन्तमार्यस्तदनु स्वां वसतिं समाससाद ॥ ६९ ॥
उषसि द्युनदीजलेऽवगाहं विरचय्याऽध्युषितस्तटं स्मरिष्यन् ।
परतत्त्वमुदारलोकवार्तामशृणोच्छङ्करदेशिको महात्मा ॥ ७० ॥
कमलासनसुन्दरीनिवासादतिमात्रं विषयेषु लब्धकीर्तिः ।
अतिसंख्यबुधैः कृताधिवासो ननु काश्मीरपदाङ्कितोऽस्ति देशः ॥ ७१ ॥
सदनं चतुराननप्रियायाः सकलज्ञाय परं प्रदेयमार्गैः ।
अररैः पिहितैः सदा चतुर्भिः प्रतिहारैः कृतमस्ति तत्र देशे ॥ ७२ ॥
प्रतिहारचतुष्टयं मदीयं बहवः संहृतवादिगर्वभाराः ।
प्रविशंकटब्राह्ममण्डपस्थाः परिरक्षन्त्यनिशं मनीषिवर्गाः ॥ ७३ ॥



अधितिष्ठति यस्य गर्भभागं शुभसिंहासनमब्जभूगृहिण्याः ।
अधिरोह्यमशेषविद्भिरेव क्षतपूतत्वविरोधिसर्वपापैः ॥ ७४ ॥
प्रतिहारमपास्य दाक्षिणात्यं सकलास्ते विवृतास्तदीयदिक्स्थैः ।
न हि सर्वविदस्ति दाक्षिणात्येष्विति तत्र प्रसृता महत्यकीर्तिः ॥ ७५ ॥
इति तां निशमय्य लोकवार्तां प्रति काश्मीरभुवं मुनिः प्रतस्थे ।
अधिरोह्यमशेषवित्पवित्रैरधिरोढुं विधिदारभद्रपीठम् ॥ ७६ ॥
अखिलप्रतिवादिनो जयन्यो विजयस्तम्भमचीखनद्दिशासु ।
स इहैष्यति शङ्करो विदध्वं विबुधा दूरगतिं तदा नतिं वा ॥ ७७ ॥
इदमादिकमुच्चकैः पठद्भिर्निजशिष्यैः कतिभिश्चिदात्मकीर्तिम् ।
श्रुतिगोचरतां नयञ्जनानां पथि काश्मीरभुवं ययौ मुनीन्द्रः ॥ ७८ ॥
तदनु द्रुहिणाङ्गनागृहस्य प्रतिहारं समुपेत्य दाक्षिणात्यम् ।
यतिराड्विवरीतुमुद्यतोऽभुद्विबुधा द्वारगता अथैनमूचुः ॥ ७९ ॥
प्रतिहारमिमं भवेत्समर्थो विवरीतुं सकलज्ञ एव नाऽन्यः ।
यदि ते सकलज्ञता बुधानां मतिमारोहय तां विवृण्वथैनम् ॥ ८० ॥
यशसि श्रवणाय संगतेऽपि द्रुहिणस्त्रीजयसंभवे मदीये ।
मम संशयमेत्य सर्ववित्त्वे सरणिं भो विबुधाः कथं निरुन्ध्वे ॥ ८१ ॥
इति वादिनि शङ्करे त ऊचुर्न हि लोकोक्तिषु सत्यतामतिर्नः ।
विचिकित्सव एव सर्ववित्त्वे तव लोकोक्त्यवबोधिते वयं तत् ॥ ८२ ॥
तदमी विबुधा मुनीन्द्र यद्यत्परिपृच्छन्ति नदन्समस्तमेतत् ।
अवधारितसर्ववेदिताशो विवृणु द्वारमिहस्थितैः सुधीभिः ॥ ८३ ॥
परिपृच्छतु तत्स यद्यदिष्टं प्रददेऽस्योत्तरमित्युदीर्य तेषाम् ।
अनुयोगमवाप्य चोत्तरं तैर्विदितोऽभूत्सकलज्ञ आर्यपादः ॥ ८४ ॥
उदघाटयत व्रजो बुधानां कृतपूर्वाध्वनिरोधनापराधः ।
क्षमयन्यतिराजमानतः सन् प्रतिहारं द्रुहिणाङ्गनागृहस्य ॥ ८५ ॥
अथ पाणिगृहीतपद्मपादः सह शिष्यप्रवरैः सुरेश्वराद्यैः ।
कतिभिश्चिदशेषविज्जगाहे भगवत्याः सदनं विधिप्रियायाः ॥ ८६ ॥
उदयुङ्क्त यदा स भद्रपीठं मुनिरारोढुमुदित्वरं तदैव ।
अशरीरवचः सशङ्कराणां सकलानां श्रुतिगोचरं बभूव ॥ ८७ ॥
शुचितासकलज्ञते भजन्यः स इहारोहणमर्हतीतरो न ।
चरमाश्रमेत्य भुक्तकान्तागण ते हन्त कथं पवित्रतेति ॥ ८८ ॥
चरमाश्रमगं शरीरमन्यद्वनिताभोगयुतं शरीरमन्यत् ।
शुचितैव ममास्त्यतो वधूनामुपभोगेऽप्यवदद्यतीन्द्र एवम् ॥ ८९ ॥
अथ सोऽधिरुरोह भद्रपीठं मणिहेमारचितं प्रसूनमाल्यैः ।
रचितार्चनमिन्ध्युमानदीपप्रकराम्रेडितकान्तिदुर्विलोकम् ॥ ९० ॥

ननृतेऽप्सरसां गणेन गीता दिवि गन्धर्ववरैर्गुणा यतीन्दोः ।
सुरदुन्दुभिताडनोत्थशब्दैर्जगदण्डं परिपूरितं तदासीत् ॥ ९१ ॥
इति तादृशभद्रपीठवासात्सकलज्ञत्वशुचित्वबोधहेतोः ।
हरितां विजयेन लब्धकीर्तेरधिकां कीर्तिमवाप संयमीन्द्रः ॥ ९२ ॥
अथ शिष्यवरान्सुरेश्वरादीन्बुधवर्यान्गुरुसम्प्रदायरक्षाम् ।
अशिषद्वसतिं च शृङ्गगिर्याद्यतिसंशुद्धपदेषु मस्करीन्द्रः ॥ ९३ ॥
बदरीवनमेत्य भिक्षुवर्यो विषयाब्दागधिदेवतानिवासात् ।
प्रणतान्निजभाष्यपाठनेन व्यतनोद्योगपरान्मुनीन्कृतार्थान् ॥ ९४ ॥
अथताननुमान्य शङ्करार्यो गतकेदारक उग्रशीतबाधाम् ।
गतवत्सु निजेषु देवदेवं समयाचिष्ट हिमार्तिशान्तिमेषाम् ॥ ९५ ॥
भगवान्नसृजन्निजात्पदाब्जादथ तप्तोदकनामकं सुतीर्थम् ।
अभवन्नरुजोऽथ ते तदास्ते प्रथिताचार्ययशोऽधुनाऽपि तीर्थम् ॥ ९६ ॥
इति संश्रवपाठधूतपापा अतिसंख्या रचयन्मनोज्ञलीलाः ।
अतिवाहयति स्म शङ्करात्मा शरदां षोडशकद्वयं महेशः ॥ ९७ ॥
संपादितस्वाभिमतार्थमेवं कैलासमासादयितुं महेशम् ।
चक्रुः समेत्य द्रुहिणादिदेवा नीरन्ध्रमाकाशमथ स्वयानैः ॥ ९८ ॥
मन्दाराणामथ दिविषदः शङ्कराचार्यमूर्ता– ।
विन्दूत्तंसे नवसुमनसः स्वाञ्जलिस्था विकीर्य ।
स्तुत्वाऽऽम्नायप्रकटनगुणं तं प्रणम्यापि भूय– ।
श्चक्रुर्विज्ञापनमिति निबन्धाञ्जलिप्रश्रमेण ॥ ९९ ॥
यदर्थमवतीर्णोऽसि धरण्यां परमेश्वर ।
तदसाधि तदायाहि स्वावासं रजताचलम् ॥ १०० ॥
देवप्रार्थनया यियासुरभवद्यावच्छिवः स्वं पदम् ।
तावच्छैवगणाग्रणीरतिजवादागत्य नन्दीश्वरः ।
तस्थौ साञ्जलिरग्रतः सह महोक्षेणाऽपि चन्द्रत्विषा ।
शृङ्गः क्षुण्णघनेन काञ्चनमयालङ्कारविद्योतिना ॥ १०१ ॥
अथ क्षणाद्येन ररक्ष धर्मं काषायदण्डादियुतं वपुस्तत् ।
चन्द्रावतंसं गजचर्मवासस्त्र्यक्षं त्रिशूलादिधरं स चक्रे ॥ १०२ ॥
उक्षेन्द्रं हेमभूषान्वितधवलतनुं सत्परिस्तोमभाजम् ।
वामं शैलादिपाणौ निजपदकमलं स्थापयित्वाऽधिरुह्य ।
विष्णुब्रह्मादिदेवैरनुसृतसरणिः सर्षिभिः सेवनोत्कैः ।
वैशाखे पौर्णमास्यामभिरजतगिरिं संप्रतस्थे महेशः ॥ १०३ ॥
गच्छञ्जवेन महता वृषभः पुरारेः । दिव्यद्विपोपरि लसज्जयदुन्दुभीनाम् ।
कोणाभिघातजनितैर्निनदैर्गभीरैः । स्पर्धां दधान इव रंहसि रोचते स्म ॥ १०४ ॥



कैलासादिपदेषु यो रचयति क्रीडां शिवाद्यात्मकः ।
सर्वज्ञोऽतिपुराण ईश्वरतमो यः सर्वविद्यागुरुः ।
कंसान्तं कृतवानपि प्रणमतां यः कं निरन्तं व्यधात् ।
लीलानिर्मितरक्षितक्षतजगस्तं नौमि नारायणम् ॥ १०५ ॥
भूत्वा यः केरलेषु द्विजगुरुशिवगुर्वाख्यधीरादधीता ।
शेषाम्नायश्रुतौघैष्टमशरदि यतीभावतत्त्वावबोधौ ।
लब्ध्वा गोविन्दनाथात्पशुपतिवचसा व्याससूत्रादिभाष्या– ।
–ण्यातन्वन्नुद्दधार त्रिजगदमुमहं शङ्कराचार्यमीडे ॥ १०६ ॥
श्रीमन्नृसिंहभारत्यभिधानांस्तान्गुरून्नमस्यामि ।
भगवत्पादपुरोगमगुरुमणिमाला मणीयते यैस्तान् ॥ १०७ ॥
अ......तब्रह्मपदाभिलाषैरमन्यत ब्रह्मपदं तृणं यैः ।
श्रीशङ्करानन्दसरस्वतीति ख्यातान्गुरूञ्ज्ञाननिधीन् भजे तान् ॥ १०८ ॥
स्वपूर्वजानां सुगतिप्रदां यो । निनाय वाणीं निजमन्ववायम् ।
तपोनुभावेन निजेन लोकम् । भगीरथो देवनदीमिवेमम् ॥ १०९ ॥
चिद्घनानन्दनाथाख्यं तं नमामि पितामहम् । अनसूयोपमानां च वेंकमाख्यां पितामहीम् ॥ ११० ॥
आकालधर्ममनवाप्तपराभवेन । दुर्दान्तवादिविजयेन कथासु येन ।
संपादितस्य यशसो जगदेनसाक्षि । तं त्र्यम्बकाख्यमहमस्मि नमन्पितृव्यम् ॥ १११ ॥
विद्वद्वरांस्त्रिविक्रमशर्मण आत्मीयपितृचरणान् ।
वन्दे......वरिष्ठां पार्वत्यभिधां च निजजननीम् ॥ ११२ ॥
गङ्गाधरशर्मभ्यां न्यायव्याकरणलाभो मे ।
याभ्यामभूद्भजे तौ कारुण्यनिधी गुरू नित्यम् ॥ ११३ ॥
षडरीन्हन्तुमिव यत् षड्भिः सर्गैः षडात्मकम् । शङ्कराभ्युदयो नाम तत्काव्यं विष्णवेऽर्पितम् ॥ ११४ ॥
यद्धीर्जगज्जातमिवासुरारे– । स्तनूरखेदाभृतशास्त्रजातम् ।
त्रिविक्रमाभिख्यतदात्मजन्मा । यः पार्वतीनन्दनतामयासीत् ॥ ११५ ॥
नीलकण्ठेन तेनाऽस्मिन् शङ्कराभ्युदयाभिधे । कृते काव्ये षष्ठ एष सर्गः संपूर्णतां गतः ॥ ११६ ॥

॥ इति श्रीशङ्कराभ्युदयाख्यकाव्ये षष्ठ सर्गः ॥

॥ सम्पूर्णश्चायं ग्रन्थः ॥

॥ इति श्रीशङ्कराभ्युदयकाव्यं संपूर्णम् ।
॥ सर्वं श्रीङ्करगुरवेऽर्पणमस्तु ॥